ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

# द्वितीयकाण्डे पञ्चमः प्रश्नः

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in**

**Version 0.3** **October 31, 2022**

## Version Notes:

**This is now the current Version 0.3 dated October 31, 2022.**

1. This replaces the earlier version 0.2 dated Aug 31, 2020.

2. This version has been updated with the errors found and reported till Oct 31, 2022.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. In this Compilation the Samita Vaakyams have been suitably aligned, synchronised and refurbished in line with "Pada Paatam".

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th June 2019 |
| 2nd | Version Number | 0.1 dated 31st May 2020 |
| 3rd | Version Number | 0.2 dated 31st Aug 2020 |

**Contents**

**2 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे द्वितीयं काण्डं......4**

**2.5 द्वितीयकाण्डे पञ्चमः प्रश्नः – इष्टिविधानं......................4**

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिःओं

# 2 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पदपाठे द्वितीयं काण्डं

## 2.5 द्वितीयकाण्डे पञ्चमः प्रश्नः – इष्टिविधानं

**TS 2.5.1.1**

विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीथ् स्वस्रीयोऽसुराणां तस्य त्रीणि शीर्.षाण्यासन्थ्–सोमपानꣳ सुरापान–मन्नादनꣳ स प्रत्यक्षं देवेभ्यो भागमवदत् परोक्षमसुरेभ्यः सर्वस्मै वै प्रत्यक्षं भागं ँवदन्ति यस्मा एव परोक्षं ँवदन्ति तस्य भाग उदित–स्तस्मादिन्द्रोऽबिभेदीदृङ् वै राष्ट्रं ँवि पर्यावर्तयतीति तस्य वज्रमादाय शीर्.षाण्यच्छिनद्–यथ् सोमपान – [ ] 1

**TS 2.5.1.1 - Padam**

विश्वरूप इति विश्व – रूपः । वै । त्वाष्ट्रः । पुरोहित इति पुरः–हितः । देवानाम् । आसीत् । स्वस्रीयः । असुराणाम् । तस्य ।

त्रीणि । शीर्.षाणि । आसन्न् । सोमपानमिति सोम - पानम् ।
सुरापानमिति सुरा - पानम् । अन्नादनमित्यन्न - अदनम् । सः ।
प्रत्यक्षमिति प्रति - अक्षम् । देवेभ्यः । भागम् । अवदत् ।
परोक्षमिति परः - अक्षम् । असुरेभ्यः । सर्वस्मै । वै । प्रत्यक्षमिति
प्रति - अक्षम् । भागम् । वदन्ति । यस्मै । एव । परोक्षमिति
परः - अक्षम् । वदन्ति । तस्य । भागः । उदितः । तस्मात् । इन्द्रः ।
अबिभेत् । ईदृङ् । वै । राष्ट्रम् । वीति । पर्यावर्तयतीति
परि - आवर्तयति । इति । तस्य । वज्रम् । आदायेत्या - दाय ।
शीर्.षाणि । अच्छिनत् । यत् । सोमपानमिति सोम-पानम् । **1 (50)**

**<u>TS 2.5.1.2</u>**

-मासीथ् स कपिञ्जलो ऽभवद् यथ् सुरापान९ं स कलविङ्को
यदन्नादन९ं स तित्तिरिस्तस्याञ्जलिना ब्रह्महत्यामुपागृह्णात् ता९ं
सँवथ्सरमबिभस्तं भूतान्यभ्यक्रोशन् ब्रह्महन्निति स
पृथिवीमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृहाणेति सा ऽब्रवीद्-वरं
वृँणै खातात् पराभविष्यन्ती मन्ये ततो मा परा भूवमितिपुरा ते-[ ] **2**

**TS 2.5.1.2 - Padam**

आसीत् । सः । कपिञ्जलः । अभवत् । यत् । सुरापानमिति

सुरा – पानम् । सः । कलविङ्कः । यत् । अन्नादनमित्यन्न–अदनम् ।

सः । तित्तिरिः । तस्य । अञ्जलिना । ब्रह्महत्यामिति ब्रह्म–हत्याम् ।

उपेति । अगृह्णात् । ताम् । सँवथ्सरमिति सं – वथ्सरम् । अबिभः ।

तम् । भूतानि । अभीति । अक्रोशन्न् । ब्रह्महन्निति ब्रह्म – हन्न् ।

इति । सः । पृथिवीम् । उपेति । असीदत् । अस्यै । ब्रह्महत्याया

इति ब्रह्म – हत्यायै । तृतीयम् । प्रतीति । गृहाण । इति । सा ।

अब्रवीत् । वरम् । वृणै । खातात् । पराभविष्यन्तीति

परा – भविष्यन्ती । मन्ये । ततः । मा । परेति । भूवम् । इति ।

पुरा । ते । **2 (50)**

**TS 2.5.1.3**

सँवथ्सरादपि रोहादित्यब्रवीत् तस्मात् पुरा सँवथ्सरात् पृथिव्यै

खातमपि रोहति वारेवृत७ ह्यस्यै तृतीयं ब्रह्महत्यायै प्रत्यगृह्णात्

तथ् स्वकृत–मिरिण–मभवत् तस्मादाहिताग्निः श्रद्धादेवः स्वकृत

इरिणे नाव स्येद्–ब्रह्महत्यायै ह्येष वर्णः स वनस्पतीनुपासीददस्यै

ब्रह्महत्यायै तृतीयं प्रति गृह्णीतेति तेऽब्रुवन् वरं ँवृणामहै

वृक्णात् – [ ] **3**

**TS 2.5.1.3 - Padam**

सँवथ्सरादिति सं – वथ्सरात् । अपीति । रोहात् । इति । अब्रवीत् ।
तस्मात् । पुरा । सँवथ्सरादिति सं – वथ्सरात् । पृथिव्यै ।
खातम् । अपीति । रोहति । वारेवृतमिति वारे – वृतम् । हि ।
अस्यै । तृतीयम् । ब्रह्महत्याया इति ब्रह्म – हत्यायै । प्रतीति ।
अगृह्णात् । तत् । स्वकृतमिति स्व – कृतम् । इरिणम् । अभवत् ।
तस्मात् । आहिताग्निरित्याहित – अग्निः । श्रद्धादेव इति
श्रद्धा – देवः । स्वकृत इति स्व – कृते । इरिणे । न । अवेति ।
स्येत् । ब्रह्महत्याया इति ब्रह्म – हत्यायै । हि । एषः । वर्णः । सः ।
वनस्पतीन् । उपेति । असीदत् । अस्यै । ब्रह्महत्याया इति
ब्रह्म – हत्यायै । तृतीयम् । प्रतीति । गृह्णीत । इति । ते । अब्रुवन्न् ।
वरम् । वृणामहै । वृक्णात् । **3 (50)**

**TS 2.5.1.4**

पराभविष्यन्तो मन्यामहे ततो मा परा भूमेत्याव्रश्चनाद्वो भूया७ँस

उत्तिष्ठानित्यब्रवीत् तस्मादाव्रश्चनाद्-वृक्षाणां भूया७ँस उत्तिष्ठन्ति

वारेवृत७ ह्येषां तृतीयं ब्रह्महत्यायै प्रत्यगृण्हन्थ्स निर्यासो ऽभवत्

तस्मान्निर्यासस्य नाऽऽश्यं ब्रह्महत्यायै ह्येष वर्णोऽथो खलु य एव

लोहितो यो वा ऽऽव्रश्चनान्निर्येषति तस्य नाऽऽश्यं – [ ] **4**

**TS 2.5.1.4 - Padam**

पराभविष्यन्त इति परा-भविष्यन्तः । मन्यामहे । ततः । मा । परेति ।

भूम । इति । आव्रश्चनादित्या-व्रश्चनात् । वः । भूया७ँसः । उदिति ।

तिष्ठान् । इति । अब्रवीत् । तस्मात् । आव्रश्चनादित्या – व्रश्चनात् ।

वृक्षाणाम् । भूया७ँसः । उदिति । तिष्ठन्ति ।

वारेवृतमिति वारे – वृतम् । हि । एषाम् । तृतीयम् । ब्रह्महत्याया

इति ब्रह्म – हत्यायै । प्रतीति । अगृह्णन्न् । सः । निर्यास इति

निः – यासः । अभवत् । तस्मात् । निर्यासस्येति निः – यासस्य ।

न । आश्यम् । ब्रह्महत्याया इति ब्रह्म-हत्यायै । हि । एषः । वर्णः ।

अथो इति । खलु । यः । एव । लोहितः । यः । वा ।

आव्रश्चनादित्या – व्रश्चनात् । निर्येषतीति निः – येषति । तस्य ।
न । आश्यम् । **4 (50)**

**TS 2.5.1.5**

काम–मन्यस्यसस्त्रीष॒ꣳसाद–मुपासीददस्यै ब्रह्महत्यायै तृतीयं
प्रति गृह्णीतेति ता अब्रुवन् वरं ँवृणामहा ऋत्वियात् प्रजां ँविन्दामहै
काममा विजनितोः सं भवामेति तस्मादृत्वियाथ् स्त्रियः प्रजां
ँविन्दन्ते काममा विजनितोः सं भवन्ति वारेवृत꣡ ह्यासां तृतीयं
ब्रह्महत्यायै प्रत्यगृह्णन्थ् सा मलवद्वासा अभवत् तस्मान्–
मलवद्वाससा न सँवदेत – [ ] 5

**TS 2.5.1.5 - Padam**

कामम् । अन्यस्य । सः । स्त्रीष॒ꣳसादमिति स्त्री – स॒ꣳसादम् ।
उपेति । असीदत् । अस्यै । ब्रह्महत्याया इति ब्रह्म – हत्यायै ।
तृतीयम् । प्रतीति । गृह्णीत । इति । ताः । अब्रुवन्न् । वरम् ।
वृणामहै । ऋत्वियात् । प्रजामिति प्र – जाम् । विन्दामहै ।
कामम् । एति । विजनितोरिति वि – जनितोः । समिति । भवाम ।
इति । तस्मात् । ऋत्वियात् । स्त्रियः । प्रजामिति प्र–जाम् । विन्दन्ते ।

कामम् । एति । विजनितोरिति वि - जनितोः । समिति । भवन्ति ।

वारेवृतमिति वारे - वृतम् । हि । आसाम् । तृतीयम् । ब्रह्महत्याया

इति ब्रह्म - हत्यायै । प्रतीति । अगृह्णन् । सा । मलवद्वासा इति

मलवत् - वासाः । अभवत् । तस्मात् । मलवद्वाससेति

मलवत् - वाससा । न । समिति । वदेत । **5 (50)**

**TS 2.5.1.6**

न सहाऽऽसीत नास्या अन्नमद्याद्-ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्या

ऽऽस्तेऽथो खल्वाहुरभ्यञ्जनं वाव स्त्रिया अन्नमभ्यञ्जनमेव न

प्रतिगृह्यं काममन्यदिति यां मलवद्वाससꣳ संभवन्ति यस्ततो जायते

सोऽभिशस्तो यामरण्ये तस्यै स्तेनो यां पराचीं तस्यै

ह्रीतमुख्यपगल्भो या स्नाति तस्या अप्सु मारुको या - [ ] **6**

**TS 2.5.1.6 - Padam**

न । सह । आसीत । न । अस्याः । अन्नम् । अद्यात् ।

ब्रह्महत्याया इति ब्रह्म - हत्यायै । हि । एषा । वर्णम् ।

प्रतिमुच्येति प्रति-मुच्य । आस्ते । अथो इति । खलु । आहुः ।

अभ्यञ्जनमित्यभि - अञ्जनम् । वाव । स्त्रियाः । अन्नम् ।

अभ्यञ्जनमित्यभि – अञ्जनम् । एव । न । प्रतिगृह्यमिति

प्रति – गृह्यम् । कामम् । अन्यत् । इति । याम् । मलवद्वाससमिति

मलवत् – वाससम् । संभवन्तीति सं – भवन्ति । यः । ततः ।

जायते । सः । अभिशस्त इत्यभि–शस्तः । याम् । अरण्ये । तस्यै ।

स्तेनः । याम् । पराचीम् । तस्यै । ह्रीतमुखीति ह्रीत – मुखी ।

अपगल्भ इत्यप – गल्भः । या । स्नाति । तस्याः ।

अप्स्वित्यप् – सु । मारुकः । या । **6 (50)**

**<u>TS 2.5.1.7</u>**

ऽभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपमारी या ऽऽङ्क्ते तस्यै

काणो या दतो धावते तस्यै श्यावदन्. या नखानि निकृन्तते तस्यै

कुनखी या कृणत्ति तस्यै क्लीबो या रज्जु॒ꣳ सृजति तस्या

उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको या खर्वेण पिबति

तस्यै खर्वस्तिस्रो रात्रीर्व्रतं चरेदञ्जलिना वा पिबेदखर्वेण वा ( )

पात्रेण प्रजायै गोपीथाय ॥ **7**

**TS 2.5.1.7 - Padam**

अभ्यङ्क इत्यभि – अङ्क्ते । तस्यै । दुश्चर्मेति दुः – चर्मा । या ।

प्रलिखत इति प्र – लिखते । तस्यै । खलतिः ।

अपमारीत्यप – मारी । या । आङ्क इत्या – अङ्क्ते । तस्यै । काणः ।

या । दतः । धावते । तस्यै । श्यावदन्निति श्याव – दन्न् । या ।

नखानि । निकृन्तत इति नि – कृन्तते । तस्यै । कुनखी । या ।

कृणत्ति । तस्यै । क्लीबः । या । रज्जुम् । सृजति । तस्याः ।

उद्बन्धुक इत्युत् – बन्धुकः । या । पर्णेन । पिबति । तस्याः ।

उन्मादुक इत्युत् – मादुकः । या । खर्वेण । पिबति । तस्यै । खर्वः ।

तिस्रः । रात्रीः । व्रतम् । चरेत् । अञ्जलिना । वा । पिबेत् ।

अखर्वेण । वा ( ) । पात्रेण । प्रजाया इति प्र – जायै ।

गोपीथाय ॥ **7 (53)**

*(यथ् सोमपानं – ते – वृक्णात्– तस्य नाश्यं – वँदेत –मारुको या –ऽखर्वेण वा – त्रीणि च) (A1)*

**TS 2.5.2.1**

त्वष्टा हतपुत्रो वीन्द्र॒ सोममाऽहरत् तस्मिन्निन्द्र उपहवमैच्छत

तं नोपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा

सोममपिबत् तस्य यदत्यशिष्यत तत् त्वष्टा ऽऽहवनीयमुप

प्रावर्तयथ् स्वाहेन्द्रशत्रु–र्वर्द्धस्वेति यदवर्तयत् तद्–वृत्रस्य वृत्रत्वं

ँयदब्रवीथ् स्वाहेन्द्रशत्रु–र्वर्द्धस्वेति तस्मादस्ये– [ ] **8**

**TS 2.5.2.1 - Padam**

त्वष्टा । हतपुत्र इति हत–पुत्रः । वीन्द्रमिति वि – इन्द्रम् । सोमम् ।

एति । अहरत् । तस्मिन्न् । इन्द्रः । उपहवमित्युप–हवम् । ऐच्छत ।

तम् । न । उपेति । अह्वयत । पुत्रम् । मे । अवधीः । इति । सः ।

यज्ञवेशसमिति यज्ञ – वेशसम् । कृत्वा । प्रासहेति प्र – सहा ।

सोमम् । अपिबत् । तस्य । यत् । अत्यशिष्यतेत्यति – अशिष्यत ।

तत् । त्वष्टा । आहवनीयमित्या–हवनीयम् । उप । प्रेति । अवर्तयत् ।

स्वाहा । इन्द्रशत्रुरितीन्द्र – शत्रुः । वर्द्धस्व । इति । यत् ।

अवर्तयत् । तत् । वृत्रस्य । वृत्रत्वमिति वृत्र–त्वम् । यत् । अब्रवीत् ।

स्वाहा । इन्द्रशत्रुरितीन्द्र – शत्रुः । वर्द्धस्व । इति । तस्मात् ।

अस्य । **8 (50)**

**TS 2.5.2.2**

–न्द्रः शत्रुरभवथ् स संभवन्नग्नीषोमावभि समभवथ् स

इषुमात्रमिषुमात्रं ँविष्वङ्ङवर्द्धत स इमान् ँलोकानवृणोद्–यदिमान्

ँलोकानवृणोत् तद्–वृत्रस्य वृत्रत्वं तस्मादिन्द्रोऽबिभेथ् स

प्रजापतिमुपाधाव–च्छत्रुर्मेऽ जनीति तस्मै वज्र॑ँ सिक्त्वा

प्रायच्छदेतेन जहीति तेनाभ्यायत तावब्रूतामग्नीषोमौ मा – [ ] **9**

**TS 2.5.2.2 - Padam**

इन्द्रः । शत्रुः । अभवत् । सः । संभवन्निति सं – भवन् ।

अग्नीषोमावित्यग्नी – सोमौ । अभि । समिति । अभवत् । सः ।

इषुमात्रमिषुमात्रमितीषुमात्रं – इषुमात्रम् । विष्वङ् । अवर्द्धत । सः ।

इमान् । लोकान् । अवृणोत् । यत् । इमान् । लोकान् । अवृणोत् ।

तत् । वृत्रस्य । वृत्रत्वमिति वृत्र–त्वम् । तस्मात् । इन्द्रः । अबिभेत् ।

सः । प्रजापतिमिति प्रजा–पतिम् । उपेति । अधावत् । शत्रुः । मे ।

अजनि । इति । तस्मै । वज्रम् । सिक्त्वा । प्रेति । अयच्छत् ।

एतेन । जहि । इति । तेन । अभीति । आयत । तौ । अब्रूताम् ।
अग्नीषोमावित्यग्नी – सोमौ । मा । **9 (50)**

**TS 2.5.2.3**

प्र हा–रावमन्तः स्व इति मम वै युव७ँस्थ इत्यब्रवीन् मामभ्येतमिति तौ भागधेयमैच्छेतां ताभ्या–मेतमग्नीषोमीय–मेकादशकपालं पूर्णमासे प्रायच्छत् तावब्रूतामभि सन्दष्टौ वै स्वो न शक्नुव ऐतुमिति स इन्द्र आत्मनः शीतरूरावजनयत् तच्छीतरूरयोर्जन्म य एव७ँ शीतरूरयोर्जन्म वेद – [ ] **10**

**TS 2.5.2.3 - Padam**

प्रेति । हाः । आवम् । अन्तः । स्वः । इति । मम । वै । युवम् ।
स्थः । इति । अब्रवीत् । माम् । अभि । एति । इतम् । इति । तौ ।
भागधेयमिति भाग – धेयम् । ऐच्छेताम् । ताभ्याम् । एतम् ।
अग्नीषोमीयमित्यग्नी – सोमीयम् ।
एकादशकपालमित्येकादश – कपालम् ।
पूर्णमास इति पूर्ण – मासे । प्रेति । अयच्छत् । तौ । अब्रूताम् ।
अभीति । सन्दष्टाविति सं – दष्टौ । वै । स्वः । न । शक्नुवः ।

ऐतुमित्या - एतुम् । इति । सः । इन्द्रः । आत्मनः ।

शीतरूराविति शीत - रूरौ । अजनयत् । तत् ।

शीतरूरयोरिति शीत - रूरयोः । जन्म । यः । एवं ।

शीतरूरयोरिति शीत - रूरयोः । जन्म । वेद । **10 (50)**

**TS 2.5.2.4**

नैनꣳ शीतरूरौ हत–स्ताभ्यामेनमभ्यनयत् तस्मा–
ज्जञ्जभ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदजहितां
प्राणो वै दक्षोऽपानः क्रतुस्तस्मा–ज्जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू
इति प्राणापानावेवाऽऽत्मन् धत्ते सर्वमायुरेति स देवता वृत्रान्–
निर्.हूय वार्त्रघ्नꣳ हविः पूर्णमासे निरवपद् घ्नन्ति वा एनं
पूर्णमास आ – [ ] **11**

**TS 2.5.2.4 - Padam**

न । एनम् । शीतरूराविति शीत - रूरौ । हतः । ताभ्याम् ।

एनम् । अभीति । अनयत् । तस्मात् । जञ्जभ्यमानात् ।

अग्नीषोमावित्यग्नी - सोमौ । निरिति । अक्रामताम् ।

प्राणापानाविति प्राण - अपानौ । वै । एनम् । तत् । अजहिताम् ।

प्राण इति प्र – अनः । वै । दक्षः । अपान इत्यप – अनः । क्रतुः ।
तस्मात् । जञ्जभ्यमानः । ब्रूयात् । मयि । दक्षक्रतू इति दक्ष–क्रतू ।
इति । प्राणापानाविति प्राण – अपानौ । एव । आत्मन्न् । धत्ते ।
सर्वम् । आयुः । एति । सः । देवताः । वृत्रात् । निर्.हूयेति
निः – हूय । वार्त्रघ्नमिति वार्त्र – घ्नम् । हविः । पूर्णमास इति
पूर्ण – मासे । निरिति । अवपत् । घ्नन्ति । वै । एनम् ।
पूर्णमास इति पूर्ण – मासे । एति । **11 (50)**

**TS 2.5.2.5**

ऽमावास्यायां प्याययन्ति तस्माद्–वार्त्रघ्नी पूर्णमासे ऽनूच्येते
वृधन्वती अमावास्यायां तथ् स७स्थाप्य वार्त्रघ्न७् हविर्वज्रमादाय
पुनरभ्यायत ते अब्रूतां द्यावापृथिवी मा प्र हा–रावयोर्वै श्रित इति ते
अब्रूतां ँवरं ँवृणावहै नक्षत्रविहिता–ऽहमसानीत्यसावब्रवी–
च्चित्रविहिता– ऽहमितीयं तस्मान्नक्षत्रविहिताऽसौ चित्रविहितेयं
ँय एवं द्यावापृथिव्योर् – [ ] **12**

**TS 2.5.2.5 - Padam**

अमावास्यायामित्यमा – वास्यायाम् । प्याययन्ति । तस्मात् ।
वार्त्रघ्नी इति वार्त्र – घ्नी । पूर्णमास इति पूर्ण – मासे ।
अन्विति । उच्येते इति । वृधन्वती इति वृधन्न् – वती ।
अमावास्यायामित्यमा – वास्यायाम् । तत् । स७स्थाप्येति
सं – स्थाप्य । वार्त्रघ्नमिति वार्त्र – घ्नम् । हविः । वज्रम् ।
आदायेत्या – दाय । पुनः । अभीति । आयत । ते इति । अब्रूताम् ।
द्यावापृथिवी इति द्यावा – पृथिवी । मा । प्रेति । हाः । आवयोः ।
वै । श्रितः । इति । ते इति । अब्रूताम् । वरम् । वृणावहै ।
नक्षत्रविहितेति नक्षत्र – विहिता । अहम् । असानि । इति ।
असौ । अब्रवीत् । चित्रविहितेति चित्र – विहिता । अहम् । इति ।
इयम् । तस्मात् । नक्षत्रविहितेति नक्षत्र – विहिता । असौ ।
चित्रविहितेति चित्र – विहिता । इयम् । यः । एवम् ।
द्यावापृथिव्योरिति द्यावा – पृथिव्योः । **12 (50)**

**TS 2.5.2.6**

वरं ँवेदैनं ँवरो गच्छति स आभ्यामेव प्रसूत इन्द्रो वृत्रमहन् ते

देवा वृत्रꣳ हत्वाऽग्नीषोमावब्रुवन् हव्यं नो वहतमिति

तावब्रूतामपतेजसौ वै त्यौ वृत्रे वै त्ययोस्तेज इति तेऽब्रुवन् क

इदमच्छैतीति गौरित्यब्रुवन् गौर्वाव सर्वस्य मित्रमिति

साऽब्रवीद् – [ ] **13**

**TS 2.5.2.6 - Padam**

वरम् । वेद । एति । एनम् । वरः । गच्छति । सः । आभ्याम् । एव ।

प्रसूत इति प्र – सूतः । इन्द्रः । वृत्रम् । अहन्न् । ते । देवाः ।

वृत्रम् । हत्वा । अग्नीषोमावित्यग्नी – सोमौ । अब्रुवन्न् । हव्यम् ।

नः । वहतम् । इति । तौ । अब्रूताम् । अपतेजसावित्यप–तेजसौ ।

वै । त्यौ । वृत्रे । वै । त्ययोः । तेजः । इति । ते । अब्रुवन्न् । कः ।

इदम् । अच्छ । एति । इति । गौः । इति । अब्रुवन्न् । गौः । वाव ।

सर्वस्य । मित्रम् । इति । सा । अब्रवीत् । **13 (50)**

**TS 2.5.2.7**

वरं ँवृणै मय्येव सतोभयेन भुनजाद्ध्वा इति तद्–गौराऽऽ *हरत्
तस्माद्–गवि सतोभयेन भुञ्जत एतद्वा अग्नेस्तेजो यद् घृतमेतथ्
सोमस्य यत् पयो य एवमग्नीषोमयो स्तेजो वेद तेजस्व्येव भवति
ब्रह्मवादिनो वदन्ति किन्देवत्यं पौर्णमासमिति प्राजापत्यमिति ब्रूयात्
तेनेन्द्रं ज्येष्ठं पुत्रं निरवासाययदिति तस्मा– ( ) –ज्ज्येष्ठं पुत्रं
धनेन निरवसाययन्ति ॥ **14**

**TS 2.5.2.7 - Padam**

वरम् । वृणै । मयि । एव । सता । उभयेन । भुनजाद्ध्वै । इति ।
तत् । गौः । एति । अहरत् । तस्मात् । गवि । सता । उभयेन ।
भुञ्जते । एतत् । वै । अग्नेः । तेजः । यत् । घृतम् । एतत् ।
सोमस्य । यत् । पयः । यः । एवं । अग्नीषोमयोरित्यग्नी–सोमयोः ।
तेजः । वेद । तेजस्वी । एव । भवति । ब्रह्मवादिन इति
ब्रह्म – वादिनः । वदन्ति । किन्देवत्यमिति किं – देवत्यम् ।
पौर्णमासमिति पौर्ण – मासम् । इति । प्राजापत्यमिति
प्रजा – पत्यम् । इति । ब्रूयात् । तेन । इन्द्रम् । ज्येष्ठम् । पुत्रम् ।

निरवासाययदिति निः–अवासाययत् । इति । तस्मात् ( ) । ज्येष्ठम् ।
पुत्रम् । धनेन । निरवसाययन्तीति निः – अवसाययन्ति ॥ **14 (54)**

*(अस्य – मा – वेदा – द्यावापृथिव्यो – रब्रवी –*
*दिति तस्मा – च्चत्वारि च) (A2)*

**TS 2.5.3.1**

इन्द्रं ँवृत्रं जघ्निवाꣳसं मृधोऽभि प्रावेपन्त स एतं ँवैमृधं
पूर्णमासेऽनुनिर्वाप्यमपश्यत् तं निरवपत् तेन वै स मृधोऽपाहत
यद्–वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति मृध एव तेन यजमानो
ऽप हत इन्द्रो वृत्रꣳ हत्वा देवताभिश्चेन्द्रियेण च व्यार्द्ध्यत स
एतमाग्नेय–मष्टाकपाल–ममावास्याया–मपश्यदैन्द्रं दधि – [ ] **15**

**TS 2.5.3.1- Padam**

इन्द्रम् । वृत्रम् । जघ्निवाꣳसम् । मृधः । अभि । प्रेति । अवेपन्त ।
सः । एतम् । वैमृधम् । पूर्णमास इति पूर्ण – मासे ।
अनुनिर्वाप्यमित्यनु – निर्वाप्यम् । अपश्यत् । तम् । निरिति ।
अवपत् । तेन । वै । सः । मृधः । अपेति । अहत । यत् । वैमृधः ।
पूर्णमास इति पूर्ण – मासे । अनुनिर्वाप्य इत्यनु – निर्वाप्यः ।

भवति । मृधः । एव । तेन । यजमानः । अपेति । हते । इन्द्रः ।
वृत्रम् । हत्वा । देवताभिः । च । इन्द्रियेण । च । वीति । आर्द्ध्यत ।
सः । एतम् । आग्नेयम् । अष्टाकपालमित्यष्टा – कपालम् ।
अमावास्यायामित्यमा – वास्यायाम् । अपश्यत् ।
ऐन्द्रम् । दधि । **15 (50)**

**<u>TS 2.5.3.2</u>**

तं निरवपत् तेन वै स देवताश्चेन्द्रियं चावारुन्धयदाग्नेयो ऽष्टाकपालो
ऽमावास्यायां भवत्यैन्द्रं दधि देवताश्चैव तेनेन्द्रियं च यजमानोऽव
रुन्ध इन्द्रस्य वृत्रं जघ्नुष इन्द्रियँ वीर्यं पृथिवीमनु व्यार्च्छत्
तदोषधयो वीरुधोऽभवन्थ्स प्रजापतिमुपाधावद्–वृत्रं मे जघ्नुष
इन्द्रियँ वीर्यं – [ ] **16**

**<u>TS 2.5.3.2 - Padam</u>**

तम् । निरिति । अवपत् । तेन । वै । सः । देवताः । च । इन्द्रियम् ।
च । अवेति । अरुन्ध । यत् । आग्नेयः । अष्टाकपाल
इत्यष्टा – कपालः । अमावास्यायामित्यमा – वास्यायाम् । भवति ।
ऐन्द्रम् । दधि । देवताः । च । एव । तेन । इन्द्रियम् । च ।

यजमानः । अवेति । रुन्धे । इन्द्रस्य । वृत्रम् । जघ्नुषः । इन्द्रियम् ।

वीर्यम् । पृथिवीम् । अनु । वीति । आर्च्छत् । तत् । ओषधयः ।

वीरुधः । अभवन्न् । सः । प्रजापतिमिति प्रजा – पतिम् । उपेति ।

अधावत् । वृत्रं । मे । जघ्नुषः । इन्द्रियम् । वीर्यम् । **16 (50)**

**<u>TS 2.5.3.3</u>**

पृथिवीमनु व्यारत् तदोषधयो वीरुधोऽभूवन्निति स प्रजापतिः

पशूनब्रवीदेतदस्मै सं नयतेति तत् पशव ओषधीभ्यो ऽध्यात्मन्थ्

समनयन् तत् प्रत्यदुहन्. यथ् समनयन् तथ् सां नाय्यस्य सांनाय्यत्वं

ँयत् प्रत्यदुहन् तत् प्रतिधुषः प्रतिधुक्त्वꣳ समनैषुः प्रत्यधुक्षन्

न तु मयि श्रयत इत्यब्रवीदेतदस्मै – [ ] **17**

**<u>TS 2.5.3.3 - Padam</u>**

पृथिवीम् । अनु । वीति । आरत् । तत् । ओषधयः । वीरुधः ।

अभूवन्न् । इति । सः । प्रजापतिरिति प्रजा – पतिः । पशून् ।

अब्रवीत् । एतत् । अस्मै । समिति । नयत । इति । तत् । पशवः ।

ओषधीभ्य इत्योषधि – भ्यः । अधीति । आत्मन्न् । समिति ।

अनयन्न् । तत् । प्रतीति । अदुहन्न् । यत् । समनयन्निति

सं – अनयन्न् । तत् । सांनाय्यस्येति सां – नाय्यस्य ।

सांनाय्यत्वमिति सांनाय्य – त्वम् । यत् । प्रत्यदुहन्निति

प्रति – अदुहन्न् । तत् । प्रतिधुष इति प्रति – धुषः ।

प्रतिधुक्त्वमिति प्रतिधुक् – त्वम् । समिति । अनैषुः । प्रतीति ।

अधुक्षन्न् । न । तु । मयि । श्रयते । इति । अब्रवीत् । एतत् ।

अस्मै । **17 (50)**

**TS 2.5.3.4**

शृतं कुरुतेत्यब्रवीत् तदस्मै शृत–मकुर्वन्निन्द्रियं ँवावास्मिन् वीर्यं

तदश्रयन् तच्छृतस्य शृतत्व७ं समनैषुः प्रत्यधुक्षञ्छृतमक्रन् न तु मा

धिनोतीत्यब्रवीदेतदस्मै दधि कुरुतेत्यब्रवीत् तदस्मै दद्ध्यकुर्वन्

तदेनमधिनोत् तद्–दद्ध्नो दधित्वं ब्रह्मवादिनो वदन्ति दद्ध्नः

पूर्वस्यावदेयं – [ ] **18**

**TS 2.5.3.4 - Padam**

शृतम् । कुरुत । इति । अब्रवीत् । तत् । अस्मै । शृतम् ।

अकुर्वन्न् । इन्द्रियम् । वाव । अस्मिन्न् । वीर्यम् । तत् । अश्रयन्न् ।

तत् । शृतस्य । शृतत्वमिति शृत – त्वम् । समिति । अनैषुः ।

प्रतीति । अधुक्षन्न् । शृतम् । अक्रन्न् । न । तु । मा । धिनोति ।

इति । अब्रवीत् । एतत् । अस्मै । दधि । कुरुत । इति । अब्रवीत् ।

तत् । अस्मै । दधि । अकुर्वन्न् । तत् । एनम् । अधिनोत् । तत् ।

दद्ध्नः । दधित्वमिति दधि – त्वम् । ब्रह्मवादिन इति ब्रह्म–वादिनः ।

वदन्ति । दद्ध्नः । पूर्वस्य । अवदेयमित्यव – देयम् । **18 (50)**

**<u>TS 2.5.3.5</u>**

दधि हि पूर्वं क्रियत इत्यनादृत्य तच्छृतस्यैव पूर्वस्याव

द्येदिन्द्रिय–मेवास्मिन् वीर्यँ श्रित्वा दद्ध्नोपरिष्टाद्धिनोति

यथापूर्वमुपैति यत् पूतीकैर्वा पर्णवल्कैर्वा ऽऽतञ्च्याथ् सौम्यं तद्–यत्

क्वलै राक्षसं तद्–यत् तण्डुलैर्वैश्वदेवं तदातञ्चनेन मानुषं

तद्–यद्–दद्ध्ना तथ् सेन्द्रं दद्ध्ना ऽऽ तनक्ति – [ ] **19**

**<u>TS 2.5.3.5 - Padam</u>**

दधि । हि । पूर्वम् । क्रियते । इति । अनादृत्येत्यना – दृत्य ।

तत् । शृतस्य । एव । पूर्वस्य । अवेति । द्येत् । इन्द्रियम् । एव ।

अस्मिन्न् । वीर्यम् । श्रित्वा । दद्ध्ना । उपरिष्टात् । धिनोति ।

यथापूर्वमिति यथा - पूर्वम् । उपेति । एति । यत् । पूतीकैः ।

वा । पर्णवल्कैरिति पर्ण - वल्कैः । वा ।

आतञ्च्यादित्या - तञ्च्यात् । सौम्यम् । तत् । यत् । क्वलैः ।

राक्षसम् । तत् । यत् । तण्डुलैः । वैश्वदेवमिति वैश्व - देवम् । तत् ।

यत् । आतञ्चनेनेत्या - तञ्चनेन । मानुषम् । तत् । यत् । दद्ध्ना ।

तत् । सेन्द्रमिति स - इन्द्रम् । दद्ध्ना । एति । तनक्ति । **19 (50)**

**<u>TS 2.5.3.6</u>**

सेन्द्रत्वाया-ग्निहोत्रोच्छेषण-मभ्यातनक्ति यज्ञस्य सन्तत्या इन्द्रो

वृत्रꣳ हत्वा परां परावत-मगच्छ-दपाराधमिति मन्यमानस्तं देवताः

प्रैषमैच्छन्थ् सोऽब्रवीत् प्रजापतिर्यः प्रथमोऽनुविन्दति तस्य प्रथमं

भागधेयमिति तं पितरोऽन्वविन्दन् तस्मात् पितृभ्यः पूर्वेद्युः क्रियते

सोऽमावास्यां प्रत्या ऽगच्छत् तं देवा अभि समगच्छन्तामा

वै नो-[ ] **20**

**<u>TS 2.5.3.6 - Padam</u>**

सेन्द्रत्वायेति सेन्द्र - त्वाय ।

अग्निहोत्रोच्छेषणमित्यग्निहोत्र - उच्छेषणम् ।

अभ्यातनक्तीत्यभि - आतनक्ति । यज्ञस्य । सन्तत्या इति सं-तत्यै । इन्द्रः । वृत्रम् । हत्वा । पराम् । परावतमिति परा - वतम् । अगच्छत् । अपेति । अराधम् । इति । मन्यमानः । तम् । देवताः । प्रैषमिति प्र - एषम् । ऐच्छन्न् । सः । अब्रवीत् । प्रजापतिरिति प्रजा - पतिः । यः । प्रथमः । अनुविन्दतीत्यनु - विन्दति । तस्य । प्रथमम् । भागधेयमिति भाग - धेयम् । इति । तम् । पितरः । अन्विति । अविन्दन्न् । तस्मात् । पितृभ्य इति पितृ - भ्यः । पूर्वेद्युः । क्रियते । सः । अमावास्यामित्यमा - वास्याम् । प्रति । एति । अगच्छत् । तम् । देवाः । अभि । समिति । अगच्छन्त । अमा । वै । नः । **20 (50)**

**<u>TS 2.5.3.7</u>**

ऽद्य वसु वसतीतीन्द्रो हि देवानां ँवसु तदमावास्याया अमावास्यत्वं ब्रह्मवादिनो वदन्ति किंदेवत्य९ सांनाय्यमिति वैश्वदेवमिति ब्रूयाद्-विश्वे हि तद्-देवा भागधेयमभि समगच्छन्तेत्यथो खल्वैन्द्रमित्येव ब्रूयादिन्द्रं ँवाव ते तद्-भिषज्यन्तोऽभि समगच्छन्तेति ॥ **21**

**TS 2.5.3.7 - Padam**

अद्य । वसु । वसति । इति । इन्द्रः । हि । देवानाम् । वसु । तत् । अमावास्याया इत्यमा – वास्यायाः । अमावास्यत्वमित्यमावास्य – त्वम् । ब्रह्मवादिन इति ब्रह्म–वादिनः । वदन्ति । किंदेवत्यमिति किं – देवत्यम् । सांनाय्यमिति सां – नाय्यम् । इति । वैश्वदेवमिति वैश्व – देवम् । इति । ब्रूयात् । विश्वे । हि । तत् । देवाः । भागधेयमिति भाग – धेयम् । अभीति । समगच्छन्तेति सं – अगच्छन्त । इति । अथो इति । खलु । ऐन्द्रम् । इति । एव । ब्रूयात् । इन्द्रम् । वाव । ते । तत् । भिषज्यन्तः । अभि । समिति । अगच्छन्त । इति ॥ **21 (42)**

***(दधि – मे जघ्नुष इन्द्रियं वीर्यं – मित्यब्रवीदेतदस्मा – अवदेयं – तनक्ति – नो – द्विचत्वारिंशच्च) (A3)***

**TS 2.5.4.1**

ब्रह्मवादिनो वदन्ति स त्वै दर्.शपूर्णमासौ यजेत य एनौ सेन्द्रौ यजेतेति वैमृधः पूर्णमासे ऽनुनिर्वाप्यो भवति तेन पूर्णमासः सेन्द्र

ऐन्द्रं दद्ध्यमावास्यायां तेनामावास्या सेन्द्रा य एवं ँविद्वान्

दर्.शपूर्णमासौ यजते सेन्द्रावेवैनौ यजते श्वःश्वोऽस्मा ईजानाय

वसीयो भवति देवा वै यद्–यज्ञे ऽकुर्वततदसुरा अकुर्वत ते

देवा एता – [ ] **22**

**TS 2.5.4.1 - Padam**

ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । सः । तु । वै ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यजेत । यः । एनौ ।

सेन्द्राविति स – इन्द्रौ । यजेत । इति । वैमृधः । पूर्णमास इति

पूर्ण – मासे । अनुनिर्वाप्य इत्यनु – निर्वाप्यः । भवति । तेन ।

पूर्णमास इति पूर्ण – मासः । सेन्द्र इति स – इन्द्रः । ऐन्द्रम् ।

दधि । अमावास्यायामित्यमा – वास्यायाम् । तेन ।

अमावास्येत्यमा – वास्या । सेन्द्रेति स – इन्द्रा । यः । एवम् ।

विद्वान् । दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यजते ।

सेन्द्राविति स – इन्द्रौ । एव । एनौ । यजते ।

श्वःश्व इति श्वः – श्वः । अस्मै । ईजानाय । वसीयः । भवति ।

देवाः । वै । यत् । यज्ञे । अकुर्वत । तत् । असुराः । अकुर्वत । ते ।

देवाः । एताम् । **22 (50)**

**TS 2.5.4.2**

-मिष्टि-मपश्यन्नाग्नावैष्णव-मेकादशकपाल९ँ सरस्वत्यै चरु९ँ

सरस्वते चरुं तां पौर्णमास९ँ स९ँस्थाप्यानु निरवपन् ततो देवा

अभवन् पराऽसुरा यो भ्रातृव्यवान्थ्स्याथ् स पौर्णमास९ँ

स९ँस्थाप्यैतामिष्टिमनु निर्वपेत् पौर्णमासेनैव वज्रं भ्रातृव्याय

प्रहृत्याऽऽग्नावैष्णवेन देवताश्च यज्ञं च भ्रातृव्यस्य वृङ्क्ते मिथुनान्

पशून्थ् सारस्वताभ्यां ँयावद्देवास्यास्ति तथ् - [ ] **23**

**TS 2.5.4.2 - Padam**

इष्टिम् । अपश्यन्न् । आग्नावैष्णवमित्याग्ना - वैष्णवम् ।

एकादशकपालमित्येकादश - कपालम् । सरस्वत्यै । चरुम् ।

सरस्वते । चरुम् । ताम् । पौर्णमासमिति पौर्ण - मासम् ।

स९ँस्थाप्येति सं - स्थाप्य । अनु । निरिति । अवपन्न् । ततः ।

देवाः । अभवन्न् । परेति । असुराः । यः ।

भ्रातृव्यवानिति भ्रातृव्य - वान् । स्यात् । सः ।

पौर्णमासमिति पौर्ण – मासम् । स॒ꣳस्थाप्येति सं–स्थाप्य । ए॒ताम् ।

इष्टिम् । अनु । निरिति । वपेत् । पौर्णमासेनेति पौर्ण – मासेन ।

ए॒व । वज्रम् । भ्रातृव्याय । प्रहृत्येति प्र – हृत्य ।

आग्नावैष्णवेनेत्याग्ना–वैष्णवेन । देवताः । च । यज्ञम् । च ।

भ्रातृव्यस्य । वृङ्क्ते । मिथुनान् । पशून् ।

सारस्वताभ्याम् । यावत् । ए॒व । अस्य । अस्ति । तत् । **23 (50)**

**TS 2.5.4.3**

सर्वं ँवृङ्क्ते पौर्णमासीमेव यजेत भ्रातृव्यवान्नामावास्याꣳ हत्वा भ्रातृव्यं

नाऽऽ प्याययति साकंप्रस्थायीयेन यजेत पशुकामोयस्मै वा

अल्पेनाऽऽहरन्ति नाऽऽत्मना तृप्यति नान्यस्मै ददाति यस्मै महता

तृप्यत्यात्मना ददात्यन्यस्मै महता पूर्णꣳ होतव्यं तृप्त एवैनमिन्द्रः

प्रजया पशुभिस्तर्पयति दारुपात्रेण जुहोति न हि मृन्मयमाहुतिमानश

औदुम्बरं – [ ] **24**

**TS 2.5.4.3 - Padam**

सर्वम् । वृङ्क्ते । पौर्णमासीमिति पौर्ण – मासीम् । ए॒व । यजेत ।

भ्रातृव्यवानिति भ्रातृव्य – वान् । न । अमावास्यामित्यमा–वास्याम् ।

हत्वा । भ्रातृव्यम् । न । एति । प्याययति । साकंप्रस्थायीयेनेति साकं – प्रस्थायीयेन । यजेत । पशुकाम इति पशु – कामः । यस्मै । वै । अल्पेन । आहरन्तीत्या – हरन्ति । न । आत्मना । तृप्यति । न । अन्यस्मै । ददाति । यस्मै । महता । तृप्यति । आत्मना । ददाति । अन्यस्मै । महता । पूर्णम् । होतव्यम् । तृप्तः । एव । एनम् । इन्द्रः । प्रजयेति प्र – जया । पशुभिरिति पशु–भिः । तर्पयति । दारुपात्रेणेति दारु – पात्रेण । जुहोति । न । हि । मृन्मयमिति मृत् – मयम् । आहुतिमित्या – हुतिम् । आनशे । औदुंबरम् । **24 (50)**

**<u>TS 2.5.4.4</u>**

भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्धे नागतश्रीर्महेन्द्रं यजेत त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्यस्तेषां महेन्द्रो देवता यो वै स्वां देवता–मतियजते प्र स्वायै देवतायैच्यवते न परां प्राप्नोति पापीयान् भवति सँवथ्सर–मिन्द्रं यजेत सँवथ्सरꣳ हि व्रतं नाति स्वै – [ ] **25**

**TS 2.5.4.4 - Padam**

भवति । ऊर्क् । वै । उदुंबरः । ऊर्क् । पशवः । ऊर्जा । एव ।
अस्मै । ऊर्जम् । पशून् । अवेति । रुन्धे । न ।
अगतश्रीरित्यगत – श्रीः । महेन्द्रमिति महा – इन्द्रम् । यजेत ।
त्रयः । वै । गतश्रिय इति गत – श्रियः । शुश्रुवान् । ग्रामणीरिति
ग्राम – नीः । राजन्यः । तेषाम् । महेन्द्र इति महा–इन्द्रः । देवता ।
यः । वै । स्वाम् । देवताम् । अतियजत इत्यति – यजते । प्रेति ।
स्वायै । देवतायै । च्यवते । न । पराम् । प्रेति । आप्नोति ।
पापीयान् । भवति । सँवथ्सरमिति सं–वथ्सरम् । इन्द्रम् ।
यजेत । सँवथ्सरमिति सं – वथ्सरम् । हि । व्रतम् । न ।
अतीति । स्वा । **25 (50)**

**TS 2.5.4.5**

–वैनं देवतेज्यमाना भूत्या इन्धे वसीयान् भवति सँवथ्सरस्य
परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेथ् सँवथ्सरमेवैनं
वृत्रं जघ्निवाꣳसमग्नि–र्व्रतपति–र्व्रतमा लम्भयति ततोऽधि कामं
यजेत ॥ **26**

**TS 2.5.4.5 - Padam**

एव । एनम् । देवता । इज्यमाना । भूत्यै । इन्धे । वसीयान् ।
भवति । सँवथ्सरस्येति सं - वथ्सरस्य । परस्तात् । अग्नये ।
व्रतपतय इति व्रत - पतये । पुरोडाशम् ।
अष्टाकपालमित्यष्टा - कपालम् । निरिति । वपेत् । सँवथ्सरमिति
सं - वथ्सरम् । एव । एनम् । वृत्रम् । जघ्निवाꣳसम् । अग्निः ।
व्रतपतिरिति व्रत-पतिः । व्रतम् । एति । लंभयति । ततः । अधीति ।
कामम् । यजेत ॥ **26 (30)**

*(एतां - त - दौदुम्बरꣳ - स्वा - त्रिꣳशच्च )(A4)*

**TS 2.5.5.1**

नासोमयाजी सं नयेदनागतं ँवा एतस्य पयो योऽसोमयाजी
यदसोमयाजी संनयेत् परिमोष एव सोऽनृतं करोत्यथो परैव सिच्यते
सोमयाज्येव सं नयेत् पयो वै सोमः पयः सांनाय्यं पयसैव पय
आत्मन् धत्ते वि वा एतं प्रजया पशुभिरर्द्धयति वर्द्धयत्यस्य
भ्रातृव्यं ँयस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा - [ ] **27**

**TS 2.5.5.1- Padam**

न । असोमयाजीत्यसोम – याजी । समिति । नयेत् ।

अनागतमित्यना – गतम् । वै । एतस्य । पयः । यः ।

असोमयाजीत्यसोम – याजी । यत् । असोमयाजीत्यसोम–याजी ।

संनयेदिति सं – नयेत् । परिमोष इति परि – मोषः । एव । सः ।

अनृतम् । करोति । अथो इति । परेति । एव । सिच्यते ।

सोमयाजीति सोम – याजी । एव । समिति । नयेत् । पयः । वै ।

सोमः । पयः । सांनाय्यमिति सां – नाय्यम् । पयसा । एव । पयः ।

आत्मन्न् । धत्ते । वीति । वै । एतम् । प्रजयेति प्र – जया ।

पशुभिरिति पशु – भिः । अर्द्धयति । वर्द्धयति । अस्य ।

भ्रातृव्यम् । यस्य । हविः । निरुप्तमिति निः – उप्तम् । पुरस्तात् ।

चन्द्रमाः । **27 (50)**

**TS 2.5.5.2**

अभ्युदेति त्रेधा तण्डुलान्. वि भजेद्–ये मद्ध्यमाः स्युस्तानग्नये

दात्रे पुरोडाशमष्टाकपालं कुर्याद्–ये स्थविष्ठास्तानिन्द्राय प्रदात्रे

दध७ श्चरुं ँये̕णिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमग्निरेवास्मै

प्रजां प्रजनयति वृद्धामिन्द्रः प्र यच्छति यज्ञो वै विष्णुः पशवः

शिपिर्यज्ञ एव पशुषु प्रति तिष्ठति न द्वे – [ ] **28**

**TS 2.5.5.2 - Padam**

अभीति । उदेतीत्युत् – एति । त्रेधा । तण्डुलान् । वीति । भजेत् ।

ये । मद्ध्यमाः । स्युः । तान् । अग्नये । दात्रे । पुरोडाशम् ।

अष्टाकपालमित्यष्टा – कपालम् । कुर्यात् । ये । स्थविष्ठाः । तान् ।

इन्द्राय । प्रदात्र इति प्र – दात्रे । दधन्न् । चरुम् । ये । अणिष्ठाः ।

तान् । विष्णवे । शिपिविष्टायेति शिपि – विष्टाय । शृते । चरुम् ।

अग्निः । एव । अस्मै । प्रजामिति प्र – जाम् । प्रजनयतीति

प्र – जनयति । वृद्धाम् । इन्द्रः । प्रेति । यच्छति । यज्ञः । वै ।

विष्णुः । पशवः । शिपिः । यज्ञे । एव । पशुषु । प्रतीति । तिष्ठति ।

न । द्वे इति । **28 (50)**

**TS 2.5.5.3**

यजेत यत् पूर्वया संप्रति यजेतोत्तरया छम्बट् कुर्याद्–यदुत्तरया

सम्प्रति यजेत पूर्वया छम्बट् कुर्यान्नेष्टिर्भवति न यज्ञस्तदनु

ह्रीतमुख्यपगल्भो जायत एकामेव यजेत प्रगल्भोऽस्य जायते ऽनादृत्य

तद् द्वे एव यजेत यज्ञमुखमेव पूर्वया ऽऽलभते यजत उत्तरया देवता एव पूर्वया ऽवरुन्ध इन्द्रिय–मुत्तरया देवलोकमेव – [ ] 29

**TS 2.5.5.3 - Padam**

यजेत । यत् । पूर्वया । संप्रतीति सं – प्रति । यजेत । उत्तरयेत्युत् – तरया । छंबट् । कुर्यात् । यत् । उत्तरयेत्युत् – तरया । संप्रतीति सं–प्रति । यजेत । पूर्वया । छंबट् । कुर्यात् । न । इष्टिः । भवति । न । यज्ञः । तत् । अन्विति । ह्लीतमुखीति ह्लीत – मुखी । अपगल्भ इत्यप – गल्भः । जायते । एकाम् । एव । यजेत । प्रगल्भ इति प्र – गल्भः । अस्य । जायते । अनादृत्येत्यना–दृत्य । तत् । द्वे इति । एव । यजेत । यज्ञमुखमिति यज्ञ – मुखम् । एव । पूर्वया । आलभत इत्या – लभते । यजते । उत्तरयेत्युत् – तरया । देवताः । एव । पूर्वया । अवरुन्ध इत्यव – रुन्धे । इन्द्रियम् । उत्तरयेत्युत् – तरया । देवलोकमिति देव – लोकम् । एव । 29 (50)

**TS 2.5.5.4**

पूर्वयाऽभिजयति मनुष्यलोकमुत्तरया भूयसो यज्ञक्रतूनुपैत्येषा वै सुमना नामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा अभ्युदेत्यस्मिन्नेवास्मै

लोकेऽर्द्धुकं भवति दाक्षायणयज्ञेन सुवर्गकामो यजेत पूर्णमासे

सं नयेन्–मैत्रावरुण्या ऽऽमिक्षया ऽमावास्यायां ँयजेत पूर्णमासे वै

देवाना७ं सुतस्तेषामेतमर्द्धमासं प्रसुतस्तेषां मैत्रावरुणी

वशाऽमावास्याया–मनूबन्ध्या यत् – [ ] **30**

**TS 2.5.5.4 - Padam**

पूर्वया । अभिजयतीत्यभि – जयति । मनुष्यलोकमिति

मनुष्य – लोकम् । उत्तरयेत्युत् – तरया । भूयसः । यज्ञक्रतूनिति

यज्ञ – क्रतून् । उपेति । एति । एषा । वै । सुमना इति सु – मनाः ।

नाम । इष्टिः । यम् । अद्य । ईजानम् । पश्चात् । चन्द्रमाः । अभीति ।

उदेतीत्युत् – एति । अस्मिन्न् । एव । अस्मै । लोके । अर्द्धुकम् ।

भवति । दाक्षायणयज्ञेनेति दाक्षायण – यज्ञेन । सुवर्गकाम इति

सुवर्ग – कामः । यजेत । पूर्णमास इति पूर्ण – मासे । समिति ।

नयेत् । मैत्रावरुण्येति मैत्रा – वरुण्या । आमिक्षया ।

अमावास्यायामित्यमा – वास्यायाम् । यजेत । पूर्णमास इति

पूर्ण – मासे । वै । देवानाम् । सुतः । तेषाम् । एतम् ।

अर्द्धमासमित्यर्द्ध – मासम् । प्रसुत इति प्र – सुतः । तेषाम् ।

मैत्रावरुणीति मैत्रा – वरुणी । वशा ।

अमावास्यायामित्यमा – वास्यायाम् ।

अनूबन्ध्येत्यनु – बन्ध्या । यत् । **30 (50)**

**TS 2.5.5.5**

पूर्वेद्यु र्यजते वेदिमेव तत् करोति यद् वथ्सानपाकरोति

सदोहविर्द्धाने एव सं मिनोति यद्–यजते देवैरेव सुत्या॑ सं

पादयति स एतमर्द्धमास॑ सधमादं देवैः सोमं पिबति यन्–

मैत्रावरुण्या ऽऽमिक्षया ऽमावास्यायां ँयजते यैवासौ देवानां

ँवशाऽनूबन्ध्या सो एवैषैतस्य साक्षाद्–वा एष देवानभ्यारोहति

य एषां ँयज्ञ – [ ] **31**

**TS 2.5.5.5 - Padam**

पूर्वेद्युः । यजते । वेदिम् । एव । तत् । करोति । यत् । वथ्सान् ।

अपाकरोतीत्यप–आकरोति । सदोहविर्द्धाने इति सदः–हविर्द्धाने ।

एव । समिति । मिनोति । यत् । यजते । देवैः । एव । सुत्याम् ।

समिति । पादयति । सः । एतम् । अर्द्धमासमित्यर्द्ध – मासम् ।

सधमादमिति सध - मादम् । देवैः । सोमम् । पिबति । यत् ।

मैत्रावरुण्येति मैत्रा - वरुण्या । आमिक्षया ।

अमावास्यायामित्यमा - वास्यायाम् । यजते । या । एव । असौ ।

देवानाम् । वशा । अनूबन्ध्येत्यनु - बन्ध्या । सो इति । एव । एषा ।

एतस्य । साक्षादिति स - अक्षात् । वै । एषः । देवान् ।

अभ्यारोहतीत्यभि - आरोहति । यः । एषाम् । यज्ञम् । **31 (50)**

**TS 2.5.5.6**

-मभ्यारोहति यथा खलुवै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविद्ध्यति पापीयान् भवति यदि नावविद्ध्यति सदृङ् व्यावृत्काम एतेन यज्ञेन यजेत क्षुरपविर्ह्येष यज्ञस्ताजक् पुण्यो वा भवति प्र वा मीयते तस्यैतद्व्रतं नानृतं ँवदेन्न मा॒ꣳस-मश्नीयान्न स्त्रियमुपेयान् नास्य पल्पूलनेन वासः पल्पूलयेयु- ( ) -रेतद्धि देवाः सर्वं न कुर्वन्ति ॥ **32**

**TS 2.5.5.6 - Padam**

अभ्यारोहतीत्यभि - आरोहति । यथा । खलु । वै । श्रेयान् ।

अभ्यारूढ इत्यभि - आरूढः । कामयते । तथा । करोति । यदि ।

अववि॒द्ध्यतीत्यव – वि॒द्ध्यति । पापीयान् । भवति । यदि । न ।

अववि॒द्ध्यतीत्यव – वि॒द्ध्यति । स॒दृङ्ङिति स – दृङ् ।

व्यावृत्काम इति व्यावृत् – कामः । ए॒तेन । य॒ज्ञेन । य॒जेत ।

क्षुरपविरिति क्षुर – पविः । हि । ए॒षः । य॒ज्ञः । ता॒जक् । पुण्यः ।

वा । भवति । प्रेति । वा । मीयते । तस्य । ए॒तत् । व्र॒तम् । न ।

अनृतम् । वदेत् । न । मा॒ऽसम् । अ॒श्ञीयात् । न । स्त्रियम् ।

उपेति । इ॒यात् । न । अ॒स्य । पल्पूलनेन । वासः ।

पल्पूलयेयुः ( ) । ए॒तत् । हि । दे॒वाः । सर्वम् । न ।

कुर्वन्ति ॥ **32 (56)** *(च॒न्द्रमा –द्वे –देवलोकमेव – यद्– य॒ज्ञं–*

*पल्पूलयेयुः –षट् च) (A5)*

**TS 2.5.6.1**

ए॒ष वै दे॒वरथो यद्–दर्.शपूर्णमा॒सौ यो दर्.शपूर्णमा॒सावि॒ष्ट्वा सोमे॒न

यजते॒ रथस्पष्ट ए॒वाव॒साने॒ वरे दे॒वाना॒मव स्यत्ये॒तानि॒ वा अङ्गापरू॒ꣳषि

सꣳवथ्स॒रस्य॒ यद्–दर्.शपूर्णमा॒सौ य ए॒वं ꣳविद्वान् दर्शपूर्णमा॒सौ

यजते–ऽङ्गापरू॒ꣳष्येव सꣳवथ्स॒रस्य॒ प्रति दधात्ये॒ते वै सꣳवथ्स॒रस्य॒

चक्षुषी यद्–दर्.शपूर्णमासौ य एवं ँविद्वान् दर्.शपूर्णमासौ यजते

ताभ्यामेव सुवर्गं ँलोकमनु पश्य – [ ] **33**

**TS 2.5.6.1 - Padam**

एषः । वै । देवरथ इति देव – रथः । यत् ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यः ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । इष्ट्वा । सोमेन ।

यजते । रथस्पष्ट इति रथ – स्पष्टे । एव । अवसान इत्यव–साने ।

वरे । देवानाम् । अवेति । स्यति । एतानि । वै ।

अङ्गापरूꣳषीत्यङ्गा – परूꣳषि । सꣳवथ्सरस्येति सं – वथ्सरस्य ।

यत् । दर्.शपूर्णमासाविति दर्.श–पूर्णमासौ । यः । एवम् । विद्वान् ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यजते ।

अङ्गापरूꣳषीत्यङ्गा – परूꣳषि । एव । सꣳवथ्सरस्येति

सं – वथ्सरस्य । प्रतीति । दधाति । एते इति । वै ।

सꣳवथ्सरस्येति सं – वथ्सरस्य । चक्षुषी इति । यत् ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यः । एवम् । विद्वान् ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यजते । ताभ्याम् । एव ।
सुवर्गमिति सुवः – गम् । लोकम् । अन्विति । पश्यति । **33 (50)**

**TS 2.5.6.2**

–त्येषा वै देवानां ँविक्रान्ति र्यद्–दर्शपूर्णमासौ य एवं ँविद्वान्
दर्शपूर्णमासौ यजते देवानामेव विक्रान्तिमनु वि क्रमत एष वै
देवयानः पन्था यद्–दर्.शपूर्णमासौ य एवं ँविद्वान् दर्.शपूर्णमासौ
यजते य एव देवयानः पन्थास्त॒ꣳ समारोहत्येतौ वै देवाना॒ꣳ हरी
यद्–दर्.शपूर्णमासौ य एवं ँविद्वान् दर्.शपूर्णमासौ यजते यावेव
देवाना॒ꣳ हरी ताभ्या – [ ] **34**

**TS 2.5.6.2 - Padam**

एषा । वै । देवानाम् । विक्रान्तिरिति वि – क्रान्तिः । यत् ।
दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यः । एवम् । विद्वान् ।
दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यजते । देवानाम् । एव ।
विक्रान्तिमिति वि – क्रान्तिम् । अनु । वीति । क्रमते । एषः । वै ।
देवयान इति देव – यानः । पन्थाः । यत् ।
दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यः । एवम् । विद्वान् ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यजते । यः । एव ।
देवयान इति देव–यानः । पन्थाः । तम् । समारोहतीति
सं – आरोहति । एतौ । वै । देवानाम् । हरी इति । यत् ।
दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यः ।
एवम् । विद्वान् । दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यजते ।
यौ । एव । देवानाम् । हरी इति । ताभ्याम् । **34 (50)**

**TS 2.5.6.3**

–मेवैभ्यो हव्यं ँवहत्येतद्–वै देवानामास्यं ँयद्–दर्.शपूर्णमासौ य
एवं ँविद्वान् दर्.शपूर्णमासौ यजते साक्षादेव देवानामास्ये जुहोत्येष
वै हविर्द्धानी यो दर्.शपूर्णमासयाजी सायंप्रातरग्निहोत्रं जुहोति
यजते दर्.शपूर्णमासा–वहरहर्.–हविर्द्धानिना॒ सुतो य एवं ँविद्वान्
दर्.शपूर्णमासौ यजते हविर्द्धान्यस्मीति सर्वमेवास्य बर्.हिष्यं दत्तं
भवति देवावा अहर् – [ ] **35**

**TS 2.5.6.3 - Padam**

एव । एभ्यः । हव्यम् । वहति । एतत् । वै । देवानाम् । आस्यम् ।
यत् । दर्.शपूर्णमासाविति दर्.श–पूर्णमासौ । यः । एवम् । विद्वान् ।
दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यजते । साक्षादिति
स – अक्षात् । एव । देवानाम् । आस्ये । जुहोति । एषः । वै ।
हविर्द्धानीति हविः – धानी । यः ।
दर्.शपूर्णमासयाजीति दर्.शपूर्णमास – याजी । सायंप्रातरिति
सायं – प्रातः । अग्निहोत्रमित्यग्नि – होत्रम् । जुहोति । यजते ।
दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । अहरहरित्यहः – अहः ।
हविर्द्धानिनामिति हविः – धानिनाम् । सुतः । यः । एवम् ।
विद्वान् । दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यजते ।
हविर्द्धानीति हविः – धानी । अस्मि । इति । सर्वम् । एव ।
अस्य । बर्.हिष्यम् । दत्तम् । भवति । देवाः । वै । अहः । **35 (50)**

**TS 2.5.6.4**

यज्ञियं नाविन्दन् ते दर्शपूर्णमासावपुनन् तौ वा एतौ पूतौ मेद्ध्यौ
यद्–दर्शपूर्णमासौ य एवं ँविद्वान् दर्शपूर्णमासौ यजते पूतावेवैनौ

मेद्ध्यौ यजते नामावास्यायां च पौर्णमास्यां च स्त्रिय–मुपेयाद्–

यदुपेयान् निरिन्द्रियः स्यात् सोमस्य वै राज्ञोऽर्द्धमासस्य रात्रयः पत्नय

आसन् तासाममावास्यां च पौर्णमासीं च नोपैत् – [ ] 36

**TS 2.5.6.4 - Padam**

यज्ञियम् । न । अविन्दन्न् । ते । दर्.शपूर्णमासाविति

दर्.श–पूर्णमासौ । अपुनन्न् । तौ । वै । एतौ । पूतौ । मेद्ध्यौ ।

यत् । दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यः । एवम् ।

विद्वान् । दर्.शपूर्णमासाविति दर्.श–पूर्णमासौ । यजते । पूतौ ।

एव । एनौ । मेद्ध्यौ । यजते । न ।

अमावास्यायामित्यमा – वास्यायाम् । च । पौर्णमास्यामिति

पौर्ण – मास्याम् । च । स्त्रियम् । उपेति । इयात् । यत् ।

उपेयादित्युप – इयात् । निरिन्द्रिय इति निः – इन्द्रियः । स्यात् ।

सोमस्य । वै । राज्ञः । अर्द्धमासस्येत्यर्द्ध – मासस्य । रात्रयः ।

पत्नयः । आसन्न् । तासाम् । अमावास्यामित्यमा–वास्याम् । च ।

पौर्णमासीमिति पौर्ण–मासीम् । च । न । उपेति । ऐत् । 36 (50)

**TS 2.5.6.5**

ते एनमभि समनह्येतां तं ँयक्ष्म आर्च्छद्–राजानं ँयक्ष्म आरदिति

तद्–राजयक्ष्मस्य जन्म यत् पापीयानभवत् तत् पापयक्ष्मस्य

यज्जायाभ्यामविन्दत् तज्जायेन्यस्य य एवमेतेषां ँयक्ष्माणां जन्म

वेद नैनमेते यक्ष्माविन्दन्ति स एते एव नमस्यन्नुपाधावत् ते

अब्रूतां ँवरं ँवृणावहा आवं देवानां भागधे असावा – [ ] **37**

**TS 2.5.6.5 - Padam**

ते इति । एनम् । अभि । समिति । अनह्येताम् । तम् । यक्ष्मः ।

आर्च्छत् । राजानम् । यक्ष्मः । आरत् । इति । तत् । राजयक्ष्मस्येति

राज – यक्ष्मस्य । जन्म । यत् । पापीयान् । अभवत् । तत् ।

पापयक्ष्मस्येति पाप – यक्ष्मस्य । यत् । जायाभ्याम् । अविन्दत् ।

तत् । जायेन्यस्य । यः । एवम् । एतेषाम् । यक्ष्माणाम् । जन्म ।

वेद । न । एनम् । एते । यक्ष्माः । विन्दन्ति । सः । एते इति । एव ।

नमस्यन्न् । उपेति । अधावत् । ते इति । अब्रूताम् । वरम् ।

वृणावहै । आवम् । देवानाम् । भागधे इति भाग – धे ।

असाव । **37 (50)**

**TS 2.5.6.6**

–ऽऽवदधि देवा इज्यान्ता इति तस्माथ् सदृशीना॒ᳶ रात्रीणाममावास्यायां च पौर्णमास्यां च देवा इज्यन्त एते हि देवानां भागधे भागधा अस्मै मनुष्या भवन्ति य एवं ँवेद भूतानि क्षुधमघ्नन्थ् सद्यो मनुष्या अर्द्धमासे देवा मासि पितरः सँवथ्सरे वनस्पतय–स्तस्मादहरह–र्मनुष्या अशन–मिच्छन्ते ऽर्धमासे देवा इज्यन्ते मासि पितृभ्यः क्रियते सँवथ्सरे वनस्पतयः फलं ( ) गृह्णन्ति य एवं ँवेद हन्ति क्षुधं भ्रातृव्यं ॥ **38**

**TS 2.5.6.6 - Padam**

आवत् । अधीति । देवाः । इज्यान्तै । इति । तस्मात् । सदृशीनाम् । रात्रीणाम् । अमावास्यायामित्यमा – वास्यायाम् । च । पौर्णमास्यामिति पौर्ण–मास्याम् । च । देवाः । इज्यन्ते । एते इति । हि । देवानाम् । भागधे इति भाग – धे । भागधा इति भाग – धाः । अस्मै । मनुष्याः । भवन्ति । यः । एवम् । वेद । भूतानि । क्षुधम् । अघ्नन्न् । सद्यः । मनुष्याः । अर्द्धमास इत्यर्द्ध – मासे । देवाः । मासि । पितरः । सँवथ्सर इति सं – वथ्सरे ।

वनस्पतयः । तस्मात् । अहरहरित्यहः – अहः । मनुष्याः ।
अशनम् । इच्छन्ते । अर्द्धमास इत्यर्द्ध–मासे । देवाः । इज्यन्ते ।
मासि । पितृभ्य इति पितृ – भ्यः । क्रियते । सँवथ्सर इति
सं – वथ्सरे । वनस्पतयः । फलम् ( ) । गृह्णन्ति ।
यः । एवम् । वेद । हन्ति । क्षुधम् । भ्रातृव्यम् ॥ **38 (57)**

***(पश्यति – ताभ्या –मह – रै – दसाव – फलं॑ – सप्त च) (A6)***

**TS 2.5.7.1**

देवा वै नर्चि न यजुष्यश्रयन्त ते सामन्नेवाश्रयन्त हिं करोति सामैवाकर्. हिम् करोतियत्रैवदेवा अश्रयन्त तत एवैनान् प्र युङ्क्ते हिं करोति वाच एवैष योगो हिं करोति प्रजा एव तद्–यजमानः सृजते त्रिः प्रथमामन्वाह त्रिरुत्तमां यँज्ञस्यैव तद् बर्.सम् – [ ] **39**

**TS 2.5.7.1 - Padam**

देवाः । वै । न । ऋचि । न । यजुषि । अश्रयन्त । ते । सामन्न् ।
एव । अश्रयन्त । हिम् । करोति । साम । एव । अकः । हिम् ।
करोति । यत्र । एव । देवाः । अश्रयन्त । ततः । एव । एनान् ।

प्रेति । युङ्क्ते । हिम् । करोति । वाचः । एव । एषः । योगः ।

हिम् । करोति । प्रजा इति प्र – जाः । एव । तत् । यजमानः ।

सृजते । त्रिः । प्रथमाम् । अन्विति । आह । त्रिः ।

उत्तमामित्युत् – तमाम् । यज्ञस्य । एव । तत् । बर्.सम् । **39 (50)**

**TS 2.5.7.2**

नह्यत्यप्रस्र(ं)साय सन्ततमन्वाह प्राणानामन्नाद्यस्य सन्तत्या अथो रक्षसामपहत्यै राथन्तरीं प्रथमामन्वाह राथन्तरो वा अयं ँलोक इममेव लोकमभि जयति त्रिर्वि गृह्णाति त्रय इमे लोका इमानेव लोकानभि जयति बार्.हतीमुत्तमा–मन्वाह बार्.हतो वा असौ लोकोऽमुमेव लोकमभि जयति प्र वो – [ ] **40**

**TS 2.5.7.2 - Padam**

नह्यति । अप्रस्र(ं)सायेत्यप्र – स्र(ं)साय । सन्ततमिति सं – ततम् ।

अन्विति । आह । प्राणानामिति प्र – अनानाम् ।

अन्नाद्यस्येत्यन्न – अद्यस्य । सन्तत्या इति सं – तत्यै । अथो इति ।

रक्षसाम् । अपहत्या इत्यप – हत्यै । राथन्तरीमिति राथं – तरीम् ।

प्रथमाम् । अन्विति । आह । राथन्तर इति राथं–तरः । वै । अयम् ।

लोकः । इमम् । एव । लोकम् । अभीति । जयति । त्रिः । वीति ।

गृह्णाति । त्रयः । इमे । लोकाः । इमान् । एव । लोकान् । अभीति ।

जयति । बार्.हतीम् । उत्तमामित्युत् – तमाम् । अन्विति । आह ।

बार्.हतः । वै । असौ । लोकः । अमुम् । एव । लोकम् । अभीति ।

जयति । प्रेति । वः । **40 (50)**

**TS 2.5.7.3**

वाजा इत्यनिरुक्तां प्राजापत्यामन्वाह यज्ञो वै प्रजापतिर्यज्ञमेव

प्रजापतिमा रभते प्र वो वाजा इत्यन्वाहान्नं वै वाजोऽन्नमेवाव रुन्धे

प्र वो वाजा इत्यन्वाह तस्मात् प्राचीनꣳ रेतो धीयते ऽग्न आ याहि

वीतय इत्याह तस्मात् प्रतीचीः प्रजा जायन्ते प्र वो वाजा – [ ] **41**

**TS 2.5.7.3 - Padam**

वाजाः । इति । अनिरुक्तामित्यनिः – उक्ताम् । प्राजापत्यामिति

प्राजा – पत्याम् । अन्विति । आह । यज्ञः । वै । प्रजापतिरिति

प्रजा – पतिः । यज्ञम् । एव । प्रजापतिमिति प्रजा–पतिम् । एति ।

रभते । प्रेति । वः । वाजाः । इति । अन्विति । आह । अन्नम् । वै ।

वाजः । अन्नम् । एव । अवेति । रुन्धे । प्रेति । वः । वाजाः । इति ।

अन्विति । आह । तस्मात् । प्राचीनम् । रेतः । धीयते । अग्ने ।
एति । याहि । वीतये । इति । आह । तस्मात् । प्रतीचीः ।
प्रजा इति प्र – जाः । जायन्ते । प्रेति । वः । वाजाः । **41 (50)**

**TS 2.5.7.4**

इत्यन्वाह मासा वै वाजा अर्द्धमासा अभिद्यवो देवा हविष्मन्तो गौर्घृताची यज्ञो देवाञ्जिगाति यजमानः सुम्नयुरिदमसीदमसीत्येव यज्ञस्य प्रियं धामाव रुन्धे यं कामयेत सर्वमायुरियादिति प्र वो वाजा इति तस्यानूच्याग्न आ याहि वीतय इति सन्ततमुत्तर–मर्द्धर्चमा लभेत – [ ] **42**

**TS 2.5.7.4 - Padam**

इति । अन्विति । आह । मासाः । वै । वाजाः । अर्द्धमासा इत्यर्द्ध – मासाः । अभिद्यव इत्यभि – द्यवः । देवाः । हविष्मन्तः । गौः । घृताची । यज्ञः । देवान् । जिगाति । यजमानः । सुम्नयुरिति सुम्न – युः । इदम् । असि । इदम् । असि । इति । एव । यज्ञस्य । प्रियम् । धाम । अवेति । रुन्धे । यम् । कामयेत । सर्वम् । आयुः । इयात् । इति । प्रेति । वः । वाजाः । इति । तस्य ।

अनूच्येत्यनु – उच्य । अग्ने । एति । याहि । वीतये । इति ।

सन्ततमिति सं – ततम् । उत्तरमित्युत् – तरम् ।

अर्द्धर्चमित्यर्द्ध – ऋचम् । एति । लभेत । **42 (50)**

**TS 2.5.7.5**

प्राणेनैवास्यापानं दाधार सर्वमायुरेति यो वा अरत्निँ सामिधेनीनां

वेदारत्नावेव भ्रातृव्यं कुरुतेऽर्द्धर्चौ सं दधात्येष वा अरत्निः

सामिधेनीनां य एवं वेदारत्नावेव भ्रातृव्यं कुरुत ऋषेर्.ऋषेर्वा एता

निर्मिता यथ् सामिधेन्यस्ता यदसम्युक्ताः स्युः प्रजया पशुभि

र्यजमानस्य वि तिष्ठेरन्नर्द्धर्चौ सं दधाति सं ( ) युनक्त्येवैनास्ता

अस्मै सँयुक्ता अवरुद्धाः सर्वामाशिषं दुह्रे ॥ **43**

**TS 2.5.7.5 - Padam**

प्राणेनेति प्र – अनेन । एव । अस्य । अपानमित्यप – अनम् ।

दाधार । सर्वम् । आयुः । एति । यः । वै । अरत्निम् ।

सामिधेनीनामिति सां – इधेनीनाम् । वेद । अरत्नौ । एव ।

भ्रातृव्यम् । कुरुते । अर्द्धर्चावित्यर्द्ध – ऋचौ । समिति ।

दधाति । एषः । वै । अरत्निः । सामिधेनीनामिति सां – इधेनीनाम् ।

यः । एवम् । वेद । अरत्नौ । एव । भ्रातृव्यम् । कुरुते ।

ऋषेर्. ऋषेरित्यृषेः – ऋषेः । वै । एताः । निर्मिता इति निः–मिताः ।

यत् । सामिधेन्य इति सां – इधेन्यः । ताः । यत् ।

असँयुक्ता इत्यसं – युक्ताः । स्युः । प्रजयेति प्र – जया ।

पशुभिरिति पशु – भिः । यजमानस्य । वीति । तिष्ठेरन्न् ।

अर्द्धर्चावित्यर्द्ध – ऋचौ । समिति । दधाति । समिति ( ) ।

युनक्ति । एव । एनाः । ताः । अस्मै । सँयुक्ता इति सं – युक्ताः ।

अवरुद्धा इत्यव – रुद्धाः । सर्वाम् । आशिषमित्या – शिषम् ।

दुहे ॥ **43 (60) (बर्.सं –** ***वो – जायन्ते प्रवो वाजा – लभेत – दधाति सं – दश च) (A7)***

**TS 2.5.8.1**

अयज्ञो वा एष योऽसामाऽग्न आ याहि वीतय इत्याह रथन्तरस्यैष वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह वामदेव्यस्यैष वर्णो बृहदग्ने सुवीर्यमित्याह बृहत एष वर्णो यदेतं तृचमन्वाह यज्ञमेव तथ्

सामन्वन्तं करोत्यग्निरमुष्मिन् ँलोक आसीदादित्योऽस्मिन् ताविमौ लोकावशान्ता – [ ] 44

**TS 2.5.8.1 - Padam**

अयज्ञः । वै । एषः । यः । असामा । अग्ने । एति । याहि । वीतये । इति । आह । रथन्तरस्येति रथं–तरस्य । एषः । वर्णः । तम् । त्वा । समिद्भिरिति समित् – भिः । अङ्गिरः । इति । आह । वामदेव्यस्येति वाम – देव्यस्य । एषः । वर्णः । बृहत् । अग्ने । सुवीर्यमिति सु – वीर्यम् । इति । आह । बृहतः । एषः । वर्णः । यत् । एतम् । तृचम् । अन्वाहेत्यनु – आह । यज्ञम् । एव । तत् । सामन्वन्तमिति सामन्न् – वन्तम् । करोति । अग्निः । अमुष्मिन्न् । लोके । आसीत् । आदित्यः । अस्मिन्न् । तौ । इमौ । लोकौ । अशान्तौ । **44 (50)**

**TS 2.5.8.2**

वास्तां ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यग्न आ याहि वीतय इत्यस्मिन् ँलोकेऽग्निमदधु र्बृहदग्ने सुवीर्यमित्यमुष्मिन् ँलोक आदित्यं ततो वा इमौ लोकावशाम्यतां ँयदेवमन्वाहानयो

लोकयोः शान्त्यै शाम्यतोऽस्मा इमौ लोकौ य एवं वेद पञ्चदश

सामिधेनीरन्वाह पञ्चदश – [ ] **45**

**TS 2.5.8.2 - Padam**

आस्ताम् । ते । देवाः । अब्रुवन्न् । एति । इत । इमौ । वि । परीति ।

ऊहाम । इति । अग्ने । एति । याहि । वीतये । इति । अस्मिन्न् ।

लोके । अग्निम् । अदधुः । बृहत् । अग्ने । सुवीर्यमिति

सु – वीर्यम् । इति । अमुष्मिन्न् । लोके । आदित्यम् । ततः । वै ।

इमौ । लोकौ । अशाम्यताम् । यत् । एवम् । अन्वाहेत्यनु – आह ।

अनयोः । लोकयोः । शान्त्यै । शाम्यतः । अस्मै । इमौ । लोकौ ।

यः । एवम् । वेद । पञ्चदशेति पञ्च – दश ।

सामिधेनीरिति सां – इधेनीः । अन्विति । आह ।

पञ्चदशेति पञ्च – दश । **45 (50)**

**TS 2.5.8.3**

वा अर्द्धमासस्य रात्रयोऽर्द्धमासशः सँवथ्सर आप्यते तासां

त्रीणि च शतानि षष्टिश्चाक्षराणि तावतीः सँवथ्सरस्य रात्रयोऽक्षरश

एव सँवथ्सरमाप्नोति नृमेधश्च परुच्छेपश्च ब्रह्मवाद्य–मवदेता–मस्मिन्

दारावार्द्रेऽग्निं जनयाव यतरो नौ ब्रह्मीयानिति नृमेधोऽभ्यवदथ्

स धूममजनयत् परुच्छेपो ऽभ्यवदथ् सोऽग्निमजनयदृष

इत्यब्रवीद्–[ ] 46

**TS 2.5.8.3 - Padam**

वै । अर्द्धमासस्येत्यर्द्ध – मासस्य । रात्रयः । अर्द्धमासश

इत्यर्द्धमास – शः । सँवथ्सर इति सं – वथ्सरः । आप्यते ।

तासाम् । त्रीणि । च । शतानि । षष्टिः । च । अक्षराणि । तावतीः ।

सँवथ्सरस्येति सं – वथ्सरस्य । रात्रयः । अक्षरश इत्यक्षर–शः ।

एव । सँवथ्सरमिति सं – वथ्सरम् । आप्नोति ।

नृमेध इति नृ – मेधः । च । परुच्छेपः । च । ब्रह्मवाद्यमिति

ब्रह्म – वाद्यम् । अवदेताम् । अस्मिन्न् । दारौ । आर्द्रे । अग्निम् ।

जनयाव । यतरः । नौ । ब्रह्मीयान् । इति । नृमेध इति नृ – मेधः ।

अभीति । अवदत् । सः । धूमम् । अजनयत् । परुच्छेपः ।

अभीति । अवदत् । सः । अग्निम् । अजनयत् । ऋषे । इति ।

अब्रवीत् । **46 (50)**

**TS 2.5.8.4**

यथ् समावद्विद्व कथा त्वमग्निमजीजनो नाहमिति सामिधेनीनामेवाहं
ँवर्णं ँवेदेत्यब्रवीद्–यद् घृतवत् पदमनूच्यते स आसां ँवर्णस्तं त्वा
समिद्भिरङ्गिर इत्याह सामिधेनीष्वेव तज्ज्योति र्जनयति स्त्रियस्तेन
यदृचः स्त्रियस्तेन यद्–गायत्रियः स्त्रियस्तेन यथ् सामिधेन्यो
वृषण्वती–मन्वाह – [ ] **47**

**TS 2.5.8.4 - Padam**

यत् । समावत् । विद्व । कथा । त्वम् । अग्निम् । अजीजनः । न ।
अहम् । इति । सामिधेनीनामिति सां – इधेनीनाम् । एव । अहम् ।
वर्णम् । वेद । इति । अब्रवीत् । यत् । घृतवदिति घृत–वत् । पदम् ।
अनूच्यत इत्यनु – उच्यते । सः । आसाम् । वर्णः । तम् । त्वा ।
समिद्भिरिति समित् – भिः । अङ्गिरः । इति । आह ।
सामिधेनीष्विति सां – इधेनीषु । एव । तत् । ज्योतिः । जनयति ।
स्त्रियः । तेन । यत् । ऋचः । स्त्रियः । तेन । यत् । गायत्रियः ।
स्त्रियः । तेन । यत् । सामिधेन्य इति सां – इधेन्यः ।
वृषण्वतीमिति वृषण् – वतीम् । अन्विति । आह । **47 (50)**

**TS 2.5.8.5**

तेन पु॒ᳪस्वती॒स्तेन॒ सेन्द्रा॒स्तेन मिथु॒ना अ॒ग्निर्दे॒वानां दू॒त आसीदु॒शना॒ काव्योऽसु॒राणां तौ प्र॒जाप॑तिं प्र॒श्ञमै॒ता॒ᳪ स प्र॒जाप॑ति॒रग्निं दू॒तं ँ॒वृणीमह॒ इत्य॒भि प॒र्याव॑र्तत॒ ततो॑ दे॒वा अभ॒वन् पराऽसु॒रा यस्यै॒वं ँ॒विदु॒षोऽग्निं दू॒तं ँ॒वृणीम॒ह इत्य॒न्वा॒ह भ॒वत्या॒त्मना॒ पराऽस्य॒ भ्रातृ॑व्यो भवत्यद्ध्व॒रव॒तीम॒न्वाह॒ भ्रातृ॑व्यमे॒वैतया॒ – [ ] **48**

**TS 2.5.8.5 - Padam**

तेन । पु॒ᳪस्वतीः । तेन । सेन्द्रा॒ इति॒ स – इ॒न्द्राः । तेन । मि॒थु॒नाः । अ॒ग्निः । दे॒वाना॒म् । दू॒तः । आसी॒त् । उ॒शना॒ । का॒व्यः । असु॒राणाम् । तौ । प्र॒जाप॑ति॒मिति॒ प्र॒जा – प॒ति॒म् । प्र॒श्ञम् । ऐ॒ता॒म् । सः । प्र॒जाप॑ति॒रिति॒ प्र॒जा – प॒तिः । अ॒ग्निम् । दू॒तम् । वृ॒णी॒म॒हे॒ । इति॑ । अ॒भीति॑ । प॒र्याव॑र्त॒तेति॒ परि॑ – आव॑र्तत । ततः॑ । दे॒वाः । अभ॑वन्न् । परेति॑ । असु॑राः । यस्य॑ । ए॒वम् । वि॒दु॒षः । अ॒ग्निम् । दू॒तम् । वृ॒णी॒म॒हे॒ । इति॑ । अ॒न्वा॒हेत्य॑नु – आह । भवति॑ । आ॒त्मना॑ । परेति॑ । अ॒स्य॒ । भ्रातृ॑व्यः । भ॒व॒ति॒ । अ॒द्ध्व॒रव॑ती॒मित्य॑द्ध्व॒र–व॒ती॒म् । अन्वि॑ति । आ॒ह॒ । भ्रातृ॑व्यम् । ए॒व । ए॒तया॑ । **48 (50)**

**TS 2.5.8.6**

ध्वरति शोचिष्केशस्तमीमह इत्याह पवित्रमेवैतद्–यजमानमेवैतया पवयति समिद्धो अग्न आहुतेत्याह परिधिमेवैतं परि दधात्यस्कन्दाय यदत ऊर्द्ध्वमभ्याददध्याद्–यथा बहिःपरिधि स्कन्दति तादृगेव तत् त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणाꣳ सहरक्षा असुराणां त एतर्ह्या शꣳसन्ते मां वरिष्यते मा – [ ] **49**

**TS 2.5.8.6 - Padam**

द्ध्वरति । शोचिष्केश इति शोचिः – केशः । तम् । ईमहे । इति । आह । पवित्रम् । एव । एतत् । यजमानम् । एव । एतया । पवयति । समिद्ध इति सं – इद्धः । अग्ने । आहुतेत्या – हुत । इति । आह । परिधिमिति परि – धिम् । एव । एतम् । परीति । दधाति । अस्कन्दाय । यत् । अतः । ऊर्द्ध्वम् । अभ्याददध्यादित्यभि – आदद्ध्यात् । यथा । बहिःपरिधीति बहिः – परिधि । स्कन्दति । तादृक् । एव । तत् । त्रयः । वै । अग्नयः । हव्यवाहन इति हव्य – वाहनः । देवानाम् । कव्यवाहन इति कव्य – वाहनः । पितृणाम् ।

सहरक्षा इति सह – रक्षाः । असुराणाम् । ते । एतर्.हि । एति ।

श॒ꣳसन्ते । माम् । वरिष्यते । माम् । **49 (50)**

**TS 2.5.8.7**

–मिति वृणीद्ध्वꣳ हव्यवाहनमित्याह य एव देवानां तं ँवृणीत

आर्.षेयं ँवृणीते बन्धोरेव नैत्यथो सन्तत्यै परस्तादर्वाचो वृणीते

तस्मात् परस्तादर्वाञ्चो मनुष्यान् पितरोऽनु प्र पिपते ॥ **50**

**TS 2.5.8.7 - Padam**

इति । वृणीद्ध्वम् । हव्यवाहनमिति हव्य – वाहनम् । इति । आह ।

यः । एव । देवानाम् । तम् । वृणीते । आर्.षेयम् । वृणीते । बन्धोः ।

एव । न । एति । अथो इति । सन्तत्या इति सं – तत्यै । परस्तात् ।

अर्वाचः । वृणीते । तस्मात् । परस्तात् । अर्वाञ्चः । मनुष्यान् ।

पितरः । अनु । प्रेति । पिपते ॥ **50 (29)**

***(अशान्ता – वाह पञ्चदशा – ब्रवी – दन्वाहै – तया – वरिष्यते***

***मा – मेकान्नत्रिꣳशच्च) (A8)***

**TS 2.5.9.1**

अग्ने महा७ं असीत्याह महान्. ह्येष यदग्नि र्ब्राह्मणेत्याह ब्राह्मणो ह्येष भारतेत्याहैष हि देवेभ्यो हव्यं भरति देवेद्ध इत्याह देवा ह्येतमैन्धत मन्विद्ध इत्याह मनुर्ह्येतमुत्तरो देवेभ्य ऐन्धर्.षिष्टुत इत्याहर्.षयो ह्येतमस्तुवन् विप्रानुमदित इत्याह – [ ] **51**

**TS 2.5.9.1 - Padam**

अग्ने । महान् । असि । इति । आह । महान् । हि । एषः । यत् । अग्निः । ब्राह्मण । इति । आह । ब्राह्मणः । हि । एषः । भारत । इति । आह । एषः । हि । देवेभ्यः । हव्यम् । भरति । देवेद्ध इति देव – इद्धः । इति । आह । देवाः । हि । एतम् । ऐन्धत । मन्विद्ध इति मनु – इद्धः । इति । आह । मनुः । हि । एतम् । उत्तर इत्युत् – तरः । देवेभ्यः । ऐन्ध । ऋषिष्टुत इत्यृषि – स्तुतः । इति । आह । ऋषयः । हि । एतम् । अस्तुवन्न् । विप्रानुमदित इति विप्र – अनुमदितः । इति । आह । **51 (50)**

**TS 2.5.9.2**

विप्रा ह्येते यच्छुश्रुवाꣳसः कविशस्त इत्याह कवयो ह्येते

यच्छुश्रुवाꣳसो ब्रह्मसꣳशित इत्याह ब्रह्मसꣳशितो ह्येष घृताहवन

इत्याह घृताहुतिर्ह्यस्य प्रियतमा प्रणीर्यज्ञानामित्याह प्रणीर्ह्येष यज्ञानाꣳ

रथी-रद्ध्वराणा-मित्याहैष हि देवरथोऽतूर्तो होतेत्याह न ह्येतं

कश्चन - [ ] 52

**TS 2.5.9.2 - Padam**

विप्राः । हि । एते । यत् । शुश्रुवाꣳसः । कविशस्त इति

कवि - शस्तः । इति । आह । कवयः । हि । एते । यत् ।

शुश्रुवाꣳसः । ब्रह्मसꣳशित इति ब्रह्म - सꣳशितः । इति । आह ।

ब्रह्मसꣳशित इति ब्रह्म - सꣳशितः । हि । एषः । घृताहवन

इति घृत - आहवनः । इति । आह । घृताहुतिरिति घृत-आहुतिः ।

हि । अस्य । प्रियतमेति प्रिय - तमा । प्रणीरिति प्र - नीः ।

यज्ञानाम् । इति । आह । प्रणीरिति प्र-नीः । हि । एषः । यज्ञानाम् ।

रथीः । अद्ध्वराणाम् । इति । आह । एषः । हि ।

देवरथ इति देव – रथः । अतूर्तः । होता । इति । आह । न । हि । एतम् । कः । चन । 52 (50)

**TS 2.5.9.3**

तरति तूर्णिर्. हव्यवाडित्याह सर्व७ह्येष तरत्यास्पात्रं जुहूर्देवानामित्याह जुहूर्ह्येष देवानां चमसो देवपान इत्याह चमसो ह्येष देवपानोऽरा७ इवाग्ने नेमिर्देवा७ स्त्वं परिभूरसीत्याह देवान् ह्येष परिभूर्यद्–ब्रूयादा वह देवान् देवयते यजमानायेति भ्रातृव्यमस्मै– [ ] 53

**TS 2.5.9.3 - Padam**

तरति । तूर्णिः । हव्यवाडिति हव्य – वाट् । इति । आह । सर्वम् । हि । एषः । तरति । आस्पात्रम् । जुहूः । देवानाम् । इति । आह । जुहूः । हि । एषः । देवानाम् । चमसः । देवपान इति देव – पानः । इति । आह । चमसः । हि । एषः । देवपान इति देव – पानः । अरान् । इव । अग्ने । नेमिः । देवान् । त्वम् । परिभूरिति परि–भूः । असि । इति । आह । देवान् । हि । एषः । परिभूरिति परि – भूः ।

यत् । ब्रूयात् । एति । वह । देवान् । देवयत इति देव – यते । यजमानाय । इति । भ्रातृव्यम् । अस्मै । **53 (50)**

**TS 2.5.9.4**

जनयेदा वह देवान् यजमानायेत्याह यजमान–मेवैतेन वर्द्धयत्यग्निमग्न आ वह सोममा वहेत्याह देवता एव तद्– यथापूर्वमुप ह्वयत आ चाग्ने देवान्. वह सुयजा च यज जातवेद इत्याहाग्निमेव तथ् स७ श्यति सोऽस्य स७शितो देवेभ्यो हव्यं वहत्यग्निर्. होते – [ ] **54**

**TS 2.5.9.4 - Padam**

जनयेत् । एति । वह । देवान् । यजमानाय । इति । आह । यजमानम् । एव । एतेन । वर्द्धयति । अग्निम् । अग्ने । एति । वह । सोमम् । एति । वह । इति । आह । देवताः । एव । तत् । यथापूर्वमिति यथा – पूर्वम् । उपेति । ह्वयते । एति । च । अग्ने । देवान् । वह । सुयजेति सु – यजा । च । यज । जातवेद इति जात–वेदः । इति । आह । अग्निम् । एव । तत् । समिति । श्यति ।

सः । अस्य । स॒ꣳशित इति सं - शितः । देवेभ्यः । हव्यम् ।
वहति । अग्निः । होता । **54 (50)**

**TS 2.5.9.5**

-त्याहाग्निर्वै देवानाꣳ होता य एव देवानाꣳ होता तं वृणीतेस्मो
वयमित्याहाऽऽत्मानमेव सत्त्वं गमयति साधु ते यजमान
देवतेत्याहाऽऽशिषमेवैतामा शास्ते यद्ब्रूयाद्-योऽग्निꣳ होतारमवृथा
इत्यग्निनोभयतो यजमानं परि गृह्णीयात् प्रमायुकः स्याद्-
यजमानदेवत्या वै जुहूर्भ्रातृव्यदेवत्योपभृद् - [ ] **55**

**TS 2.5.9.5 - Padam**

इति । आह । अग्निः । वै । देवानाम् । होता । यः । एव ।
देवानाम् । होता । तम् । वृणीते । स्मः । वयम् । इति । आह ।
आत्मानम् । एव । सत्त्वमिति सत् - त्वम् । गमयति । साधु । ते ।
यजमान । देवता । इति । आह । आशिषमित्या - शिषम् । एव ।
एताम् । एति । शास्ते । यत् । ब्रूयात् । यः । अग्निम् । होतारम् ।
अवृथाः । इति । अग्निना । उभयतः । यजमानम् । परीति ।
गृह्णीयात् । प्रमायुक इति प्र - मायुकः । स्यात् ।

यजमानदेवत्येति यजमान – देवत्या । वै । जुहूः ।

भ्रातृव्यदेवत्येति भ्रातृव्य – देवत्या । उपभृदित्युप – भृत् । **55 (50)**

**TS 2.5.9.6**

यद्–द्वे इव ब्रूयाद् भ्रातृव्यमस्मै जनयेद् घृतवतीमद्ध्वर्यो

स्रुचमाऽस्यस्वेत्याह यजमान–मेवैतेन वर्द्धयति देवायुवमित्याह

देवान् ह्येषाऽवति विश्ववारामित्याह विश्व॒ ह्येषाऽवतीडामहै देवा॑

ईडेन्यान् नमस्याम नमस्यान्. यजाम यज्ञियानित्याह मनुष्या वा

ईडेन्याः पितरो नमस्या देवा यज्ञिया देवता एव ( ) तद्–यथाभागं

यजति ॥ **56**

**TS 2.5.9.6 - Padam**

यत् । द्वे इति । इव । ब्रूयात् । भ्रातृव्यम् । अस्मै । जनयेत् ।

घृतवतीमिति घृत – वतीम् । अद्ध्वर्यो इति । स्रुचम् । एति ।

अस्यस्व । इति । आह । यजमानम् । एव । एतेन । वर्द्धयति ।

देवायुवमिति देव – युवम् । इति । आह । देवान् । हि । एषा ।

अवति । विश्ववारामिति विश्व–वाराम् । इति । आह । विश्वम् । हि ।

एषा । अवति । ईडामहै । देवान् । ईडेन्यान् । नमस्याम । नमस्यान् ।

यजाम । यज्ञियान् । इति । आह । मनुष्याः । वै । ईडेन्याः ।
पितरः । नमस्याः । देवाः । यज्ञियाः । देवताः । एव ( ) । तत् ।
यथाभागमिति यथा – भागम् । यजति ॥ **56 (53)**

*(विप्रानुमदित इत्याह – चना – ऽस्मै – होतो – पभृद् –*
*देवता एव – त्रीणि च) (A9)*

**TS 2.5.10.1**

त्रीꣳ स्तृचाननु ब्रूयाद्–राजन्यस्य त्रयो वा अन्ये राजन्यात् पुरुषा ब्राह्मणो वैश्यः शूद्रस्तानेवास्मा अनुकान् करोति पञ्चदशानु ब्रूयाद्–राजन्यस्य पञ्चदशो वै राजन्यः स्व एवैनꣳ स्तोमे प्रति ष्ठापयति त्रिष्टुभा परि दद्ध्यादिन्द्रियं ँवै त्रिष्टुगिन्द्रियकामः खलु वै राजन्यो यजते त्रिष्टुभैवास्मा इन्द्रियं परि गृह्णाति यदि कामयेत–[ ] **57**

**TS 2.5.10.1 - Padam**

त्रीन् । तृचान् । अन्विति । ब्रूयात् । राजन्यस्य । त्रयः । वै । अन्ये ।
राजन्यात् । पुरुषाः । ब्राह्मणः । वैश्यः । शूद्रः । तान् । एव ।
अस्मै । अनुकानित्यनु – कान् । करोति ।
पञ्चदशेति पञ्च – दश । अन्विति । ब्रूयात् । राजन्यस्य ।

पञ्चदश इति पञ्च-दशः । वै । राजन्यः । स्वे । एव । एनम् ।
स्तोमे । प्रतीति । स्थापयति । त्रिष्टुभा । परीति । दद्ध्यात् ।
इन्द्रियम् । वै । त्रिष्टुक् । इन्द्रियकाम इतीन्द्रिय – कामः । खलु ।
वै । राजन्यः । यजते । त्रिष्टुभा । एव । अस्मै । इन्द्रियम् । परीति ।
गृह्णाति । यदि । कामयेत । **57 (50)**

**<u>TS 2.5.10.2</u>**

ब्रह्मवर्चसमस्त्विति गायत्रिया परि दद्ध्याद्-ब्रह्मवर्चसं ँवै गायत्री
ब्रह्मवर्चसमेव भवति सप्तदशानु ब्रूयाद्-वैश्यस्य सप्तदशो वै
वैश्यः स्व एवैन७ स्तोमे प्रति ष्ठापयतिजगत्या परि दद्ध्याज्जागता
वै पशवः पशुकामः खलु वै वैश्यो यजते जगत्यैवास्मै पशून्
परि गृह्णात्येकवि७्शतिमनु ब्रूयात् प्रतिष्ठाकामस्यैकवि७्शः स्तोमानां
प्रतिष्ठा प्रतिष्ठित्यै – [ ] **58**

**<u>TS 2.5.10.2 - Padam</u>**

ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । अस्तु । इति । गायत्रिया । परीति ।
दद्ध्यात् । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । वै । गायत्री ।
ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । एव । भवति ।

सप्तदशेति सप्त - दश । अन्विति । ब्रूयात् । वैश्यस्य ।
सप्तदश इति सप्त - दशः । वै । वैश्यः । स्वे । एव । एनम् ।
स्तोमे । प्रतीति । स्थापयति । जगत्या । परीति । दद्ध्यात् । जागताः ।
वै । पशवः । पशुकाम इति पशु - कामः । खलु । वै । वैश्यः ।
यजते । जगत्या । एव । अस्मै । पशून् । परीति । गृह्णाति ।
एकवि॒ꣳशतिमित्येक - वि॒ꣳशतिम् । अन्विति । ब्रूयात् ।
प्रतिष्ठाकामस्येति प्रतिष्ठा - कामस्य । एकवि॒ꣳश इत्येक-वि॒ꣳशः ।
स्तोमानाम् । प्रतिष्ठेति प्रति - स्था ।
प्रतिष्ठित्या इति प्रति - स्थित्यै । **58 (50)**

**<u>TS 2.5.10.3</u>**

चतुर्वि॒ꣳशतिमनु ब्रूयाद्-ब्रह्मवर्चसकामस्य चतुर्वि॒ꣳशत्यक्षरा
गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैवास्मै ब्रह्मवर्चसमव रुन्धे
त्रि॒ꣳशतमनु ब्रूयादन्नकामस्य त्रि॒ꣳशदक्षरा विराडन्नं ँविराड्
विराजैवास्मा अन्नाद्यमव रुन्धे द्वात्रि॒ꣳशतमनु ब्रूयात् प्रतिष्ठाकामस्य
द्वात्रि॒ꣳशदक्षरा ऽनुष्टुगनुष्टुप् छन्दसां प्रतिष्ठा प्रतिष्ठित्यै षट्त्रि॒ꣳशतमनु

ब्रूयात् पशुकामस्य षट्त्रिꣳशदक्षरा बृहती बार्.हताः पशवो

बृहत्यैवास्मै पशू – [ ] 59

**TS 2.5.10.3 - Padam**

चतुर्विꣳशतिमिति चतुः – विꣳशतिम् । अन्विति । ब्रूयात् ।

ब्रह्मवर्चसकामस्येति ब्रह्मवर्चस – कामस्य ।

चतुर्विꣳशत्यक्षरेति चतुर्विꣳशति – अक्षरा । गायत्री ।

गायत्री । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । गायत्रिया । एव ।

अस्मै । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । अवेति । रुन्धे ।

त्रिꣳशतम् । अन्विति । ब्रूयात् । अन्नकामस्येत्यन्न – कामस्य ।

त्रिꣳशदक्षरेति त्रिꣳशत् – अक्षरा । विराडिति वि – राट् । अन्नम् ।

विराडिति वि – राट् । विराजेति वि – राजा । एव । अस्मै ।

अन्नाद्यमित्यन्न – अद्यम् । अवेति । रुन्धे । द्वात्रिꣳशतम् । अन्विति ।

ब्रूयात् । प्रतिष्ठाकामस्येति प्रतिष्ठा – कामस्य ।

द्वात्रिꣳशदक्षरेति द्वात्रिꣳशत् – अक्षरा । अनुष्टुगित्यनु – स्तुक् ।

अनुष्टुबित्यनु – स्तुप् । छन्दसाम् । प्रतिष्ठेति प्रति – स्था ।

प्रतिष्ठित्या इति प्रति – स्थित्यै । षट्त्रि॒ꣳशतमिति षट्–त्रि॒ꣳशतम् ।

अन्विति । ब्रूयात् । पशुकामस्येति पशु – कामस्य ।

षट्त्रि॒ꣳशदक्षरेति षट्त्रि॒ꣳशत् – अक्षरा । बृहती ।

बार्.हताः । पशवः । बृहत्या । एव । अस्मै । पशून् । **59 (50)**

**TS 2.5.10.4**

–नव रुन्धे चतुश्चत्वारि॒ꣳशतमनु ब्रूयादिन्द्रियकामस्य

चतुश्चत्वारि॒ꣳशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप् त्रिष्टुभैवास्मा इन्द्रियमव

रुन्धे ऽष्टाचत्वारि॒ꣳशतमनु ब्रूयात् पशुकामस्याष्टाचत्वारि॒ꣳशदक्षरा

जगती जागताः पशवोजगत्यैवास्मै पशूनव रुन्धे सर्वाणि

छन्दाꣳस्यनु ब्रूयाद्–बहुयाजिनः सर्वाणि वा एतस्य

छन्दाꣳस्यवरुद्धानि यो बहुयाज्यपरिमितमनु

ब्रूयादपरिमितस्यावरुध्यै ॥ **60**

**TS 2.5.10.4 - Padam**

अवेति । रुन्धे । चतुश्चत्वारि॒ꣳशतमिति चतुः – चत्वारि॒ꣳशतम् ।

अन्विति । ब्रूयात् । इन्द्रियकामस्येतीन्द्रिय – कामस्य ।

चतुश्चत्वारि॒ꣳशदक्षरेति चतुश्चत्वारि॒ꣳशत् – अक्षरा । त्रिष्टुक् ।

इन्द्रियम् । त्रिष्टुप् । त्रिष्टुभा । एव । अस्मै । इन्द्रियम् । अवेति ।

रुन्धे । अष्टाचत्वारिꣳशतमित्यष्टा – चत्वारिꣳशतम् । अन्विति ।

ब्रूयात् । पशुकामस्येति पशु – कामस्य ।

अष्टाचत्वारिꣳशदक्षरेत्यष्टाचत्वारिꣳशत् – अक्षरा । जगती ।

जागताः । पशवः । जगत्या । एव । अस्मै । पशून् । अवेति ।

रुन्धे । सर्वाणि । छन्दाꣳसि । अन्विति । ब्रूयात् । बहुयाजिन इति

बहु – याजिनः । सर्वाणि । वै । एतस्य । छन्दाꣳसि ।

अवरुद्धानीत्यव – रुद्धानि । यः । बहुयाजीति बहु – याजी ।

अपरिमितमित्यपरि – मितम् । अन्विति । ब्रूयात् ।

अपरिमितस्येत्यपरि – मितस्य ।

अवरुद्ध्या इत्यव – रुद्ध्यै ॥ **60 (47)**

***(कामयेत – प्रतिष्ठित्यै – पशून्थ् – सप्तचत्वारिꣳशच्च) (A10)***

**<u>TS 2.5.11.1</u>**

निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुप व्ययते

देवलक्ष्ममेव तत् कुरुते तिष्ठन्नन्वाह तिष्ठन्. ह्याश्रुततरं ँवदति

तिष्ठन्नन्वाह सुवर्गस्य लोकस्याभिजित्या आसीनो यजत्यस्मिन्नेव
लोके प्रति तिष्ठति यत् क्रौञ्चमन्वाहाऽऽसुरं तद्–यन्मन्द्रं मानुषं
तद्–यदन्तरा तथ् सदेवमन्तराऽनूच्य॑ सदेवत्वाय विद्वा॑सो वै–[ ] **61**

**TS 2.5.11.1 - Padam**

निवीतमिति नि – वीतम् । मनुष्याणाम् । प्राचीनावीतमिति
प्राचीन – आवीतम् । पितृणाम् । उपवीतमित्युप – वीतम् ।
देवानाम् । उपेति । व्ययते । देवलक्ष्ममिति देव – लक्ष्मम् । एव ।
तत् । कुरुते । तिष्ठन्न् । अन्विति । आह । तिष्ठन्न् । हि ।
आश्रुततरमित्याश्रुत – तरम् । वदति । तिष्ठन्न् । अन्विति ।
आह । सुवर्गस्येति सुवः – गस्य । लोकस्य । अभिजित्या
इत्यभि – जित्यै । आसीनः । यजति । अस्मिन्न् । एव । लोके ।
प्रतीति । तिष्ठति । यत् । क्रौञ्चम् । अन्वाहेत्यनु–आह । आसुरम् ।
तत् । यत् । मन्द्रम् । मानुषम् । तत् । यत् । अन्तरा । तत् ।
सदेवमिति स – देवम् । अन्तरा । अनूच्यमित्यनु – उच्यम् ।
सदेवत्वायेति सदेव – त्वाय । विद्वा॑सः । वै । **61 (50)**

**TS 2.5.11.2**

पुरा होतारोऽभूवन् तस्माद्–विधृता अद्ध्वानोऽभूवन् न पन्थानः समरुक्षन्नन्तर्वेद्यन्यः पादो भवति बहिर्वेद्यन्योऽथान्वाहाद्ध्वनाँ विधृत्यै पथामस॒ँरोहायाथो भूतं चैव भविष्यच्चाव रुन्धेऽथो परिमितं चैवापरिमितं चाव रुन्धेऽथो ग्राम्या॑श्चैव पशूनारण्या॑श्चाव रुन्धेऽथो – [ ] **62**

**TS 2.5.11.2 - Padam**

पुरा । होतारः । अभूवन्न् । तस्मात् । विधृता इति वि – धृताः । अद्ध्वानः । अभूवन्न् । न । पन्थानः । समिति । अरुक्षन्न् । अन्तर्वेदीत्यन्तः – वेदि । अन्यः । पादः । भवति । बहिर्वेदीति बहिः – वेदि । अन्यः । अथ । अन्विति । आह । अद्ध्वनाम् । विधृत्या इति वि – धृत्यै । पथाम् । अस॒ँरोहायेत्यसं – रोहाय । अथो इति । भूतम् । च । एव । भविष्यत् । च । अवेति । रुन्धे । अथो इति । परिमितमिति परि – मितम् । च । एव । अपरिमितमित्यपरि – मितम् । च । अवेति । रुन्धे । अथो इति ।

ग्राम्यान् । च । एव । पशून् । आरण्यान् । च । अवेति । रुन्धे ।
अथो इति । **62 (50)**

**TS 2.5.11.3**

देवलोकं चैव मनुष्यलोकं चाभि जयति देवा वै सामिधेनीरनूच्य
यज्ञं नान्वपश्यन्थ्स प्रजापतिस्तूष्णी–माघारमा ऽघारयत् ततो वै
देवा यज्ञमन्वपश्यन्. यत् तूष्णीमाघार–माघारयति यज्ञस्यानुख्यात्या
अथो सामिधेनीरेवाभ्यनक्त्यलूक्षो भवति य एवं वेदाथो
तर्पयत्येवैना–स्तृप्यति प्रजया पशुभि – [ ] **63**

**TS 2.5.11.3 - Padam**

देवलोकमिति देव – लोकम् । च । एव । मनुष्यलोकमिति
मनुष्य – लोकम् । च । अभीति । जयति । देवाः । वै ।
सामिधेनीरिति सां – इधेनीः । अनूच्येत्यनु – उच्य ।
यज्ञम् । न । अन्विति । अपश्यन्न् । सः । प्रजापतिरिति
प्रजा – पतिः । तूष्णीम् । आघारमित्या–घारम् । एति । अघारयत् ।
ततः । वै । देवाः । यज्ञम् । अन्विति । अपश्यन्न् । यत् । तूष्णीम् ।
आघारमित्या – घारम् । आघारयतीत्या – घारयति । यज्ञस्य ।

अनुख्यात्या इत्यनु – ख्यात्यै । अथो इति । सामिधेनीरिति

सां – इधेनीः । एव । अभीति । अनक्ति । अलूक्षः । भवति । यः ।

एवम् । वेद । अथो इति । तर्पयति । एव । एनाः । तृप्यति ।

प्रजयेति प्र – जया । पशुभिरिति पशु – भिः । **63 (50)**

**TS 2.5.11.4**

–र्य एवं ँवेद यदेकया ऽऽघारयेदेकां प्रीणीयाद्–यद् द्वाभ्यां द्वे

प्रीणीयाद्–यद् तिसृभिरति तद्रेचयेन् मनसाऽऽ घारयति मनसा

ह्यनाप्तमाप्यते तिर्यञ्चमा घारयत्यछम्बट्कारं ँवाक् च

मनश्चाऽऽर्तीयेतामहं देवेभ्यो हव्यं ँवहामीति वागब्रवीदहं देवेभ्य इति

मनस्तौ प्रजापतिं प्रश्नमैता७ सोऽब्रवीत् – [ ] **64**

**TS 2.5.11.4 - Padam**

यः । एवम् । वेद । यत् । एकया । आघारयेदित्या – घारयेत् ।

एकाम् । प्रीणीयात् । यत् । द्वाभ्याम् । द्वे इति । प्रीणीयात् । यत् ।

तिसृभिरिति तिसृ – भिः । अतीति । तत् । रेचयेत् ।

मनसा । एति । घारयति । मनसा । हि । अनाप्तम् । आप्यते ।

तिर्यञ्चम् । एति । घारयति । अछंबट्कारमित्यछंबट् – कारम् ।

वाक् । च । मनः । च । आर्तीयेताम् । अहम् । देवेभ्यः । हव्यम् । वहामि । इति । वाक् । अब्रवीत् । अहम् । देवेभ्यः । इति । मनः । तौ । प्रजापतिमिति प्रजा – पतिम् । प्रश्नम् । ऐताम् । सः । अब्रवीत् । **64 (50)**

**TS 2.5.11.5**

प्रजापतिर्दूतीरेव त्वं मनसोऽसि यद्धि मनसा ध्यायति तद्–वाचा वदतीति तत् खलु तुभ्यं न वाचा जुहवन्नित्यब्रवीत् तस्मान्मनसा प्रजापतये जुह्वति मन इव हि प्रजापतिः प्रजापतेराप्त्यै परिधीन्थ्सं मार्ष्टि पुनात्येवैनान्त्रिर्मद्ध्यमं त्रयो वै प्राणाः प्राणानेवाभि जयति त्रिर्दक्षिणार्द्ध्यं त्रय – [ ] **65**

**TS 2.5.11.5 - Padam**

प्रजापतिरिति प्रजा – पतिः । दूतीः । एव । त्वम् । मनसः । असि । यत् । हि । मनसा । ध्यायति । तत् । वाचा । वदति । इति । तत् । खलु । तुभ्यम् । न । वाचा । जुहवन्न् । इति । अब्रवीत् । तस्मात् । मनसा । प्रजापतय इति प्रजा – पतये । जुह्वति । मनः । इव । हि । प्रजापतिरिति प्रजा – पतिः । प्रजापतेरिति प्रजा – पतेः । आप्त्यै ।

परिधीनिति परि – धीन् । समिति । मार्ष्टि । पुनाति । एव । एनान् ।
त्रिः । मद्ध्यमम् । त्रयः । वै । प्राणा इति प्र – अनाः ।
प्राणानिति प्र – अनान् । एव । अभिति । जयति । त्रिः ।
दक्षिणार्द्ध्यमिति दक्षिण – अर्द्ध्यम् । त्रयः । **65 (50)**

**TS 2.5.11.6**

इमे लोका इमानेव लोकानभि जयति त्रिरुत्तरार्द्ध्यं त्रयो वै देवयानाः पन्थानस्तानेवाभि जयति त्रिरुप वाजयति त्रयो वै देवलोका देवलोकानेवाभि जयति द्वादश सं पद्यन्ते द्वादश मासाः सँवथ्सरःसँवथ्सरमेव प्रीणात्यथो सँवथ्सरमेवास्माउप दधाति सुवर्गस्य लोकस्य समष्ट्या आघारमा घारयति तिर इव – [ ] **66**

**TS 2.5.11.6 - Padam**

इमे । लोकाः । इमान् । एव । लोकान् । अभीति । जयति । त्रिः ।
उत्तरार्द्ध्यमित्युत्तर – अर्द्ध्यम् । त्रयः । वै । देवयाना इति
देव – यानाः । पन्थानः । तान् । एव । अभीति । जयति । त्रिः ।
उपेति । वाजयति । त्रयः । वै । देवलोका इति देव – लोकाः ।
देवलोकानिति देव – लोकान् । एव । अभीति । जयति ।

द्वादश । समिति । पद्यन्ते । द्वादश । मासाः । सँवथ्सर इति सं – वथ्सरः । सँवथ्सरमिति सं – वथ्सरम् । एव । प्रीणाति । अथो इति । सँवथ्सरमिति सं – वथ्सरम् । एव । अस्मै । उपेति । दधाति । सुवर्गस्येति सुवः – गस्य । लोकस्य । समष्ट्या इति सं – अष्ट्यै । आघारमित्या – घारम् । एति । घारयति । तिरः । इव । **66 (50)**

**<u>TS 2.5.11.7</u>**

वै सुवर्गो लोकः सुवर्गमेवास्मै लोकं प्र रोचयत्यृजुमा घारयत्यृजुरिव हि प्राणः सन्ततमा घारयति प्राणानामन्नाद्यस्य सन्तत्या अथो रक्षसामपहत्यै यं कामयेत प्रमायुकः स्यादिति जिह्मं तस्याऽऽघारयेत् प्राणमेवास्माज्जिह्मं नयति ताजक् प्र मीयतेशिरो वा एतद्–यज्ञस्य यदाघार आत्मा ध्रुवा – [ ] **67**

**<u>TS 2.5.11.7 - Padam</u>**

वै । सुवर्ग इति सुवः – गः । लोकः । सुवर्गमिति सुवः – गम् । एव । अस्मै । लोकम् । प्रेति । रोचयति । ऋजुम् । एति । घारयति । ऋजुः । इव । हि । प्राण इति प्र – अनः । सन्ततमिति सं – ततम् ।

एति । घारयति । प्राणानामिति प्र – अनानाम् ।

अन्नाद्यस्येत्यन्न – अद्यस्य । सन्तत्या इति सं – तत्यै । अथो इति ।

रक्षसाम् । अपहत्या इत्यप – हत्यै । यम् । कामयेत । प्रमायुक इति

प्र – मायुकः । स्यात् । इति । जिह्मम् । तस्य । एति । घारयेत् ।

प्राणमिति प्र–अनम् । एव । अस्मात् । जिह्मम् । नयति । ताजक् ।

प्रेति । मीयते । शिरः । वै । एतत् । यज्ञस्य । यत् ।

आघार इत्या – घारः । आत्मा । ध्रुवा । **67 (50)**

**<u>TS 2.5.11.8</u>**

ऽऽघारमाघार्य ध्रुवा॑ समनक्त्यात्मन्नेव यज्ञस्य शिरः प्रति

दधात्यग्निर्देवानां दूत आसीद् दैव्योऽसुराणां तौ प्रजापतिं प्रश्नमैता॑

स प्रजापति र्ब्राह्मण–मब्रवीदेतद्–वि ब्रूहीत्या श्रावयेतीदं देवाः

शृणुतेति वाव तदब्रवीदग्नि र्देवो होतेति य एव देवानां तमवृणीत

ततो देवा – [ ] **68**

**<u>TS 2.5.11.8 - Padam</u>**

आघारमित्या – घारम् । आघार्येत्या – घार्य । ध्रुवाम् । समिति ।

अनक्ति । आत्मन्न् । एव । यज्ञस्य । शिरः । प्रतीति । दधाति ।

अग्निः । देवानाम् । दूतः । आसीत् । दैव्यः । असुराणाम् । तौ ।
प्रजापतिमिति प्रजा – पतिम् । प्रश्ञम् । ऐताम् । सः ।
प्रजापतिरिति प्रजा – पतिः । ब्राह्मणम् । अब्रवीत् । एतत् । वीति ।
ब्रूहि । इति । एति । श्रावय । इति । इदम् । देवाः । शृणुत । इति ।
वाव । तत् । अब्रवीत् । अग्निः । देवः । होता । इति । यः । एव ।
देवानाम् । तम् । अवृणीत । ततः । देवाः । **68 (50)**

**<u>TS 2.5.11.9</u>**

अभवन् पराऽसुरा यस्यैवं ँविदुषः प्रवरं प्रवृणते भवत्यात्मना
पराऽस्य भ्रातृव्यो भवति यद्–ब्राह्मणश्चाब्राह्मणश्च प्रश्ञमेयातां
ब्राह्मणायाधि ब्रूयाद् यद्–ब्राह्मणायाद्ध्याहाऽऽत्मने ऽद्ध्याह यद्–ब्राह्मणं
पराहाऽऽत्मानं परा ऽऽह तस्माद् ब्राह्मणो न परोच्यः ॥ **69**

**<u>TS 2.5.11.9 - Padam</u>**

अभवन्न् । परेति । असुराः । यस्य । एवम् । विदुषः । प्रवरमिति
प्र – वरम् । प्रवृणत इति प्र – वृणते । भवति । आत्मना । परेति ।
अस्य । भ्रातृव्यः । भवति । यत् । ब्राह्मणः । च । अब्राह्मणः । च ।
प्रश्ञम् । एयातामित्या – इयाताम् । ब्राह्मणाय । अधीति । ब्रूयात् ।

यत् । ब्राह्मणाय । अद्ध्याहेत्यधि–आह । आत्मने । अधीति ।

आह । यत् । ब्राह्मणम् । पराहेति परा – आह । आत्मानम् । परेति ।

आह । तस्मात् । ब्राह्मणः । न । परोच्य इति परा–उच्यः ॥ **69 (40)**

*(वा – आरण्याꣳश्चाव रुन्धेऽथो – पशुभिः – सोऽब्रवीद् – दक्षिणार्ध्यं त्रय –इव – ध्रुवा – देवा – श्चत्वारिꣳशच्च ) (A11)*

**TS 2.5.12.1**

आयुष्ट आयुर्दा अग्न आ प्यायस्व सं ते ऽव ते हेड उदुत्तमं प्र णो

देव्या नो दिवो ऽग्नाविष्णू अग्नाविष्णू इमं मे वरुण तत्त्वा

याम्युदु त्यम् चित्रम् ॥

अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्द्ध्वो विद्युतं ँवसानः ।

तस्य ज्येष्ठं महिमानं ँवहन्तीर्. हिरण्यवर्णाः परि यन्ति यह्वीः ॥

स – [ ] **70**

**TS 2.5.12.1 - Padam**

आयुः । ते । आयुर्दा इत्यायुः – दाः । अग्ने । एति । प्यायस्व ।

समिति । ते । अवेति । ते । हेडः । उदिति । उत्तममित्युत् – तमम् ।

प्रेति । नः । देवी । एति । नः । दिवः । अग्नाविष्णू इत्यग्ना–विष्णू ।

अग्नाविष्णू इत्यग्ना – विष्णू । इमम् । मे । वरुण । तत् । त्वा ।
यामि । उदिति । उ । त्यम् । चित्रम् ॥ अपाम् । नपात् । एति । हि ।
अस्थात् । उपस्थमित्युप – स्थम् । जिह्मानाम् । ऊर्द्ध्वः ।
विद्युतमिति वि – द्युतम् । वसानः ॥ तस्य । ज्येष्ठम् । महिमानम् ।
वहन्तीः । हिरण्यवर्णा इति हिरण्य – वर्णाः । परीति । यन्ति ।
यह्वीः ॥ समिति । **70 (50)**

**TS 2.5.12.2**

–मन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिꣳ शुचयो दीदिवाꣳस–मपां नपातं परितस्थुरापः ।
तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ॥
स शुक्रेण शिक्वना रेवदग्निर्दीदायानिद्ध्मो घृतनिर्णिगफ्सु ॥
इन्द्रावरुणयोरहꣳ सम्राजोरव आ वृणे ।
ता नो मृडात ईदृशे ॥
इन्द्रावरुणा युवमद्ध्वराय नो – [ ] **71**

**TS 2.5.12.2 - Padam**

अन्याः । यन्ति । उपेति । यन्ति । अन्याः । समानम् । ऊर्वम् ।

नद्यः । पृणन्ति ॥ तम् । उ । शुचिम् । शुचयः । दीदिवाꣳसम् ।

अपाम् । नपातम् । परीति । तस्थुः । आपः ॥ तम् । अस्मेराः ।

युवतयः । युवानम् । मर्मृज्यमानाः । परीति । यन्ति । आपः ॥

सः । शुक्रेण । शिक्वना । रेवत् । अग्निः । दीदाय । अनिद्ध्मः ।

घृतनिर्णिगिति घृत – निर्णिक् । अफ्स्वित्यप् – सु ॥

इन्द्रावरुणयोरितीन्द्रा – वरुणयोः । अहम् । सम्राजोरिति

सं – राजोः । अवः । एति । वृणे ॥ ता । नः । मृडातः । ईदृशे ॥

इन्द्रावरुणेतीन्द्रा – वरुणा । युवम् । अद्ध्वराय । नः । **71 (50)**

**TS 2.5.12.3**

विशे जनाय महि शर्म यच्छतं ।

दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ॥

आ नोमित्रावरुणा प्रबाहवा ॥

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः ।

यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत् ॥

स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।

अव यक्ष्व नो वरुण॒ं – [ ] **72**

**TS 2.5.12.3 - Padam**

विशे । जनाय । महि । शर्म । यच्छतम् ॥ दीर्घप्रयज्युमिति

दीर्घ – प्रयज्युम् । अतीति । यः । वनुष्यति । वयम् । जयेम ।

पृतनासु । दूढ्यः ॥ एति । नः । मित्रावरुणेति मित्रा – वरुणा ।

प्रेति । बाहवा ॥ त्वम् । नः । अग्ने । वरुणस्य । विद्वान् । देवस्य ।

हेडः । अवेति । यासिसीष्ठाः ॥ यजिष्ठः । वह्नितम इति वह्नि–तमः ।

शोशुचानः । विश्वा । द्वेषा॒ंसि । प्रेति । मुमुग्धि । अस्मत् ॥ सः ।

त्वम् । नः । अग्ने । अवमः । भव । ऊती । नेदिष्ठः । अस्याः ।

उषसः । व्युष्टाविति वि – उष्टौ ॥ अवेति । यक्ष्व । नः ।

वरुणम् । **72 (50)**

**TS 2.5.12.4**

रराणो वीहि मृडीक॒ं सुहवो न एधि ॥

प्रप्रायमग्निर्भरतस्य शृण्वे वि यथ् सूर्यो न रोचते बृहद्भाः ।

अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ॥

प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु ।

धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् ॥ **73**

**TS 2.5.12.4 - Padam**

रराणः । वीहि । मृडीकम् । सुहव इति सु – हवः । नः । एधि ॥

प्रप्रेति प्र – प्र । अयम् । अग्निः । भरतस्य । शृण्वे । वीति । यत् ।

सूर्यः । न । रोचते । बृहत् । भाः ॥ अभीति । यः । पूरुम् ।

पृतनासु । तस्थौ । दीदाय । दैव्यः । अतिथिः । शिवः । नः ॥ प्रेति ।

ते । यक्षि । प्रेति । ते । इयर्मि । मन्म । भुवः । यथा । वन्द्यः । नः ।

हवेषु ॥ धन्वन्न् । इव । प्रपेति प्र – पा । असि । त्वम् । अग्ने ।

इयक्षवे । पूरवे । प्रत्न । राजन्न् ॥ **73 (50)**

**TS 2.5.12.5**

वि पाजसा वि ज्योतिषा ॥

स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः ।

उरुक्षयेषु दीद्यत् ॥

तꣳ सुप्रतीकꣳ सुदृशꣳ स्वञ्चमविद्वाꣳसो विदुष्टरꣳ सपेम ।

स यक्ष–द्विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत् ॥

अ॒ꣳहो॒मुचे॑ वि॒वे॒ष यन्मा॒ वि॑ न॑ इ॒न्द्रे॑ न्द्र क्ष॒त्रमि॑न्द्रि॒याणि॑

शतक्र॒तो ऽनु॑ ते दायि ॥ **74**

**TS 2.5.12.5 - Padam**

वीति॑ । पाज॑सा । वीति॑ । ज्योति॑षा ॥ सः । त्वम् । अ॒ग्ने॒ ।

प्रती॑केन । प्रती॑ति । ओ॒ष॒ । या॒तु॒धान्य॑ इति॑ यातु – धा॒न्यः॑ ॥

उ॒रु॒क्ष॒ये॑ष्वित्यु॑रु – क्षये॑षु । दीद्य॑त् ॥ तम् । सु॒प्रती॑क॒मिति॑

सु – प्रती॑कम् । सु॒दृ॒शमिति॑ सु – दृ॒शम्॑ । स्वञ्च॑म् ।

अवि॑द्वाꣳसः । वि॒दुष्ट॑र॒मिति॑ वि॒दुः – त॒रम् । स॒पे॒म ॥ सः । य॒क्ष॒त् ।

विश्वा॑ । व॒युना॑नि । वि॒द्वान् । प्रेति॑ । ह॒व्यम् । अ॒ग्निः । अ॒मृते॑षु ।

वो॒च॒त् ॥ अ॒ꣳहो॒मु॒च॒ इत्य॑ꣳहः – मुचे॑ । वि॒वे॑ष । यत् । मा॒ । वीति॑ ।

न॒ः । इ॒न्द्र॒ । इन्द्र॑ । क्ष॒त्रम् । इ॒न्द्रि॒याणि॑ । श॒त॒क्र॒तो॒ इति॑ शत–क्र॒तो॒ ।

अन्विति॑ । ते॒ । दा॒यि॒ ॥ **74 (44)**

*(य॒ह्वीः स – म॒द्ध्व॒राय॑ नो॒ – वरु॑णꣳ – रा॒ज॒ꣳ –*

*श्चतु॑श्चत्वारिꣳशच्च) (A12)*

=====================

**Prasna Korvai with starting Padams of 1 to 12 Anuvaakams :-**

(विश्वरूप – स्त्वष्टे – न्द्रं वृत्रं – ब्रह्मवादिनः स त्वै – नासोमयाज्ये – ष वै देवरथो – देवा वै नर्चि ना – यज्ञो – ऽग्ने महान् – त्रीन् – निवीत – मायुष्टे – द्वादश)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(विश्वरूपो – नैनं शीतरूरा – वद्य वसु – पूर्वेद्यु – र्वाजा इत्य – ग्ने महान् – निवीत – मन्या यन्ति – चतुः सप्ततिः )

**First and Last Padam of Fifth Prasnam of Kandam 2:-**

(विश्वरूपो – ऽनु ते दायि)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे

द्वितीयकाण्डे पञ्चमः प्रश्नः समाप्तः ॥

## Summary breakup of Padam - in Kaandam 2, Prasnam 5

| Particulars | | Example ( in Pada PaaTam) | No. of Padams as per Pada PaaTam |
|---|---|---|---|
| सामान्य पदानि | Ord | इषे । त्वा । ऊर्जे । | 2753 |
| उपसर्ग पदानि | PRE | एति = (आ+इति) । उपेति = (उप+इति) । प्रेति = (प्र+इति) । | 270 |
| वेष्टन पदानि | PS | उपायवः = उपायव इत्युप - आयवः ।<br>बाहुभ्याम् = बाहुभ्यामिति बाहु - भ्याम्) । | 601 |
| प्रग्रह पदानि | PG | ते = (ते इति) । त्वे = (त्वे इति) । चक्षुषी = (चक्षुषी इति) ।<br>विष्णो = विष्णो इति॒ । | 32 |
| प्रग्रह वेष्टन पदानि | PGS | अधिषवणे = अधिषवणे इत्यधि - सवने ।<br>इन्द्राग्नी = इन्द्राग्नी इतीन्द्र - अग्नी | 9 |
| | | Total Padams | 3665 |

## Details of Panchati and Padam for Kandam 2 , Prasanam 5 (TS 2.5)

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 7 | 353 |
| Anuvakam 2 | 7 | 354 |
| Anuvakam 3 | 7 | 342 |
| Anuvakam 4 | 5 | 230 |
| Anuvakam 5 | 6 | 306 |
| Anuvakam 6 | 6 | 307 |
| Anuvakam 7 | 5 | 260 |
| Anuvakam 8 | 7 | 329 |
| Anuvakam 9 | 6 | 303 |
| Anuvakam 10 | 4 | 197 |
| Anuvakam 11 | 9 | 440 |
| Anuvakam 12 | 5 | 244 |
| Total → | 74 | 3665 |

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in**